M. T. B. COLLEGE, SURAT
Manuscripts Library
No Ref. / Ser. 664
Title: Tithi Nirnaya

664

664

तिथिनिर्णयः

Tithi Nirnaya	Title
Nageśa Bhaṭṭa	Author
	Editor
	Year, Vols.
	Publisher
664	Remarks

अत्रकालनिर्णयेंदुशेखरारंभः

नाकेश

श्रीगणेशाय नमः तिथिर्द्वेधा संपूर्णा खंडाच सूर्योदयमारभ्याद्वितीयसूर्योदयपर्यंता संपूर्णा सूर्योदयमारभ्य सूर्यास्तपर्यंतापि अर्द्धमात्रसाध्ये
कर्मणि संपूर्णा मोदयान्मध्याह्नपर्यंतामपि तावन्मात्रसाध्येकर्मणि संपूर्णेति तदमलू विलोक्ये रात्रिस्तु तत्रविहित कर्मातिरिक्त कर्मणिनिष्फलू
तदितरा खंडा तत्रपूर्णाया मसंदेहात् खंडा निर्णेया तत्रनिषेधसा निर्णेया तस्यकालमात्रापाप्तितहात् किंतुविधावेवं मन्वादियुगादि ग्रह
वैधतिव्यतीपातेषु विधिनिषेधेपितत्कालव्यापितैव तानिकर्माणि दैवानिपित्र्याणिच दैवानि उपवासैकभक्त नक्त याचित व्रतदानरूपाणि
अर्द्धरात्रात: संगवमध्याह्नापरा ह्नसायाह्नात्मक: पंचधा विभागएव प्रायेणग्राह्य: तत्रोपवासोहोरात्राभोजनसंकल्पपालनरूप: एकभक्तं तदेक
रात्रावहिनद्वितीयभोजनाभाव विशिष्टमध्याह्नभोजनं एकभक्तं तादृशमेव प्रदोषभोजनं नक्तं अयाचितलब्धस्य तादृशमेव सकृत्भोज
नमयाचितं एषु विशिष्टमात्रं मध्याह्नादिसाध्यं विशेषणंप्रस्तुतेरात्रसाध्यएव तत्र यस्यकर्मणोय: कालस्तद्व्यापिनीतिथिस्तत्रकर्मणि ग्राह्यसु
सर्वा: तत्रकर्मकालव्याप्ते पंचपक्षा: पूर्वद्युरेव साकल्येनैकदेशेनवा परद्युरेववा तथाउभयद्यु: कार्त्स्न्येनसा उभयद्यु रेकदेशेपिनसा उभयद्यु रे
कदेशेनेति अहोपिद्वेधं साकल्येनैवेत्येवंवेति तत्र या एकत्रैवकार्त्स्न्येन एकदेशेनवा कर्मकालव्यापिनी सेवग्राह्या क्वचिदपवादोवक्ष्यते वैधव्यण
वासो यदा माधिककालभोगिनीसाग्राह्या साध्येन व्याप्तो मत्कर्मसध्याह्नादावेवाप कम्यसमाप्यते तत्रप्रधानोपक्रमकालयोगिनी ग्राह्या प्रदातरिन
द्वयपि कर्मकालव्याप्तिसदस्पर्शेवा पूर्वमेवोपक्रम्यवा मध्याह्नादावनुष्ठीयमाने कर्मणि साकल्येनतदेकदेशस्पर्शीसेव्य कर्मकालव्याप्यद्विर्गामेषु नि
र्णयो युग्मवाक्यादिभि: तत्रद्वितीयैकादश्योश्चतुर्थीपंचम्यो: षष्ठीसप्तम्यो: अष्टमीनवम्यो: एकादशी द्वादश्यो श्चतुर्दशीपूर्णिमयो: प्रतिपदमयो: पूर्व
तिथिर्ग्राह्यतयाऽविरोधात् कुत्रचित्कर्मविशेषापि व्यवस्थापयिष्यते एवंचमान्तरेण पूर्वस्या: परस्यावा तिथेर्ग्राह्यत्वे सिद्धे तदर्द्धभागे तिथेरभावेपि तत्रैव तत्कर्मा
नुष्ठानं उदयास्तगामिन्यो: साकल्यस्य देवलोक्ते: इदं उदयान्तरं अस्तात्सूर्यवा वर्त्तमानतिथिर्ग्राह्यत्वे साकल्यंच त्रिमुहूर्त्तसत्वएव नतुतेन न्यूनत्वे क्वचित् त्रिमुहू
र्त्तया अपि ग्राह्यत्वकथनं त्रिमुहूर्त्तावश्यं ग्राह्येत्येतत्परं अपिशब्दघटितवाक्यस्य दानस्नानादौ द्विमुहूर्त्तानुकल्प: दृश्यते अस्तात्सूर्यं तु त्रिमुहूर्त्तवसत्वेवा
पेक्षिता एवंवैधिकापित्रिमुहूर्त्तवद्वैधिकानन्यूना एवंलोकेपि तादृग्वैधव्यवहार: क्वचिद्रात्रिकार्ये रात्रिवेधोपियदि मात्रादिनासाकल्येन तत्कालेत
त्तिथ्यभावे कर्मानुष्ठानं तत्तन्मन्वादियुगादिग्रहणवैधतव्यतीपात कर्त्तव्यस्नानश्राद्धादिनित्यकर्मविषयं तेषांतु तत्कालावर्त्तिन्या मुषितिथौ निर्णयेव
त्रास्तानांतत्तत्तिथिमात्रे एवानुष्ठानं नतत्कालप्रतीक्षा उपवासेतु उभयत्रिमुहूर्त्तन्यूनाधिक्ये यामिव उभयत्रिमुहूर्त्ताधिक्यायामपि सत्युत्तरस्या मुषितिथे
कालव्याप्तिवशात्सर्वैव यातु उभयत्र्यूनत्वेतु परदिने नास्त्येव त्रिमुहूर्त्तन्यूनावा साअयुग्मा पिपूर्वैव परंतु तस्यांन मुख्य उपवास: किंत्वनुकल्प: न्यू
नयापरसंमतवैधे ग्राह्यत्ववोधकानि यानिच त्रिमुहूर्त्तन्यूनायाअपि ग्राह्यत्वबोधकानि तानितानिहारस्तुतिपरत्वेन एकादशीविषयाणिवा एकमूलकल्प
नालाघवात् यातुत्रिमुहूर्त्तपूर्वतिथिर्द्विमुहूर्त्तोत्तरदिने त्रिमुहूर्त्तोसा परायुग्मवेसतिपरैव युग्मत्वंकुपक्रमकालेसत्वाच्च यातुता दृशी पूर्वतिथा युग्मात्साप्
रैव युग्मत्वाद्धारात्रव्रतेहाच्च. अस्तमध्यवर्त्तिन्यो अपि आद्यासाकल्येन सैकल्यकालेपि सत्वात्च सकल्यश्च प्रात: कालएवेत्यर्वाचीनमतेनैव कर्मका-
लमुकूलेनमूलेनाधिकरणतयोक्तेद्व्यामुकतिथ्युपवासमहं करिष्ये इति अनेकदिनसाध्येतु अद्यप्रभृतितावदंतं करिष्य इति सच शेषव शात्पश्चमकोटय
न्तं श्रद्धयापात्रेसाग्रमूलफलपुष्पान्वितेजले गृहीत्वा पूर्वादद्युरेवेन उदद्युरेवेनवा नक्तकाले यथादिशेत्रे ईशान्यां जलप्रक्षेपेण काम: कार्य:
पात्राभावेहस्तेनापि मूलमंत्रेतु सर्वथावर्त्ये उपवासो तादिनेचभोजनासंकल्प
रणं तन्नास्ति श्रूयते स्मृतिरूपभवे यूयंहरिं एवंकार्ये धारणेवापवासांगं भाद्रपदशु
क्लेतिसंकल्पविषय एवा अप्रार्थनरूपप्रतिनिधिविधानाच्च एवं एकभक्तनक्तदिष्वपीति माधव: उपवास एवंहरेय युक्तंलाघवं तिथिनक्ष

नस्यांच नवमीवेधो हस्तेनरदहगतस्ते त्रिस्पृशत्वं अवमत्वं चेति दोषचतुष्टयं वर्ज्यं पुष्ययोगश्चप्राशस्त्यमिति निर्णयामृते अस्यव्रतस्यारंभोऽस्मिन् सकृत्स्तूर्ये नास्यारंभः कार्यः द्वितीयादिप्रयोगेतु निषिद्धेऽपिसमापनं पुनःप्रारंभ्य कृतमेव अतएवोक्तं नारदीये ज्येष्ठाश्रवण अलक्ष्म्याः पूजा स्त्रीणां मुक्ता। तत्रयेवंज्येष्ठा युतासैव ग्राह्या पूर्वापरा वा अत्रकर्मकालयोगे नक्षत्रशब्दः मासमुभाद्रश्रवणएव दिनद्वयेपितदयोगेऽहन्यामेव नतुनक्तंतिथ्यंतरे अत्राष्टमीवेध दिनद्वयेपि तथायोगेतुभ
धाङ्गत्वे नक्षत्रयोगस्तेषरा अन्यथात्रापिपूर्वयोगेपूर्वेति कोचित् यत्तु केवलं ज्येष्ठर्क्षेपि विहितंव्रतांतरं तत्तु मध्याह्नोत्तरमपि यदिनज्येष्ठा व्याप्तिस्तदिनएव न्यूनेतदु
क्तदिनएव तिथिविशेषेतन्मध्याह्नादूर्ध्वं अप्राप्तव दित्येके सत्यं भानुवार युक्तज्येष्ठर्क्षस्येव नील ज्येष्ठेतिनाम केवल नाक्षत्र व्रते दृष्टेः भानुज्येष्ठ हस्यर्क्षे वदंनामतिमाध
वादयः यत्तु अत्रितिथिविशेषोक्तिर्देवस्य व्रते तत्रपक्षद्वयेपि नवमीयुताष्टमी एतद्विषयाएव सप्तमी विद्धा निषिद्धा दशम्यादौ नवमीतुपक्षद्वयेपि अष्टमीयुतैवसदेत्यर्थः
रामनवमीव्रतेतु मध्याह्नव्यापिनी सा मध्याह्नश्च पंचधर्क्षविभागेन त्रेधाविभागेतीतिकेचित् आवर्तनारव्यमुहूर्तनएवात्रमध्याह्नः कृष्ण हृष्यामध्यरात्रवदितिपरे दिन
द्वयेपि मध्याह्नव्याप्तौ तदव्याप्तौ तदेकदेशव्याप्तौ वा यापुनर्वसुयुता साकार्या तादृश्यां दिनद्वये पि पुनर्वसुयोगे मध्याह्नेनयोगवती ग्राह्या दिनद्वये मध्याह्नतथो
गवती ग्राह्या दिनद्वयेपि मध्याह्नेतथायोगे मध्याह्नविहन्यदा तथायोगसवेधाऽयोगे दानादेव द्वयंप्रतिसर्वोऽप्रतिनिर्णयः रामोपासनौत्रयेव तथस्यत्वे इतिनवमी
दशमीतु दिनद्वयेकर्मकाल व्यापिनीपरा पूर्वीवा यथेष्टया ग्राह्या असर्वकार्येषु अन्यत्रु पक्षेषूर्ववेतिहेमाद्रिः माधवस्तुकर्कोऽयमेवकालव्याप्त्या दुर्निर्णये सति
हरेर्वाक्यात्तुरविव्यवस्थामाह दशमीसर्वापि पूर्ववेवत्वन्यइतिदशमी एकादशीतुसर्वकार्येषु द्वादशीयुतैव उपवासेतु निनेष्यते इत्यादशमी द्वादशीतु सर्व
कार्येष्वेकादशीयुतैव तत्रैकादशी द्वादशीउपवासेरवंउत्तरतिथौरुक दिनेप्राप्तेतदापक्रमप्राप्तेतत्रैवकार्या यदातुतिथेरवंउत्तरोपवासपूर्वनेरंतर्येणप्राप्नोतितदा
प्रक्रांतद्वादश्युपवासन कर्तव्यः प्रधानानुरोधादेकादश्युपवासांगंपारणं बाधित्वोपवासद्वयंकार्यं अनुपक्रांतेतन्नोपक्रमितव्यमुपवासद्वयंकृत्वा माधव
ल्लाभिधारणं कृत्वापक्रांतेअनुपक्रांतेवा द्वादश्युपवासकार्यएवेत्याह अन्यत्रतिथिष्वपि नैरंतर्येणोपवासप्राप्तावयमेवनिर्णयः इतिद्वादशी ॥

कृष्णेदशमीतु कृष्णेनाहा शुक्लाद्वादशी उपवासेविद्धपूर्वैकर्म कर्मसु यात्रशुक्लात्रयोदशेदशीपूर्वाग्राह्या नसाप्यूनव्याप्तिनी किंत्वापराह्णिकव्यापिपूर्वा का त्रयोदशीवेनापराह्णे
व्यापिपूर्ववशुक्ला साकृष्णापि यस्मिन्दिने नक्तंभवेत्तदापूर्वेपि इतित्रयोदशी चतुर्दशीशुक्लापरा कृष्णापूर्वा उपवासेतु पक्षद्वयेपिपरैव एवंकृष्णेपि रुद्रटवेधो
पवासेतुपक्षद्वयेपाव्यापराह्णिकेति केचित्पूर्वैव आपराह्णिकेलाभेतत्रापिपरैव एवंकृष्णापिपूर्वालाभेपरैव दर्शनकपवित्रारोपणेतु शुक्लेपि दैवस्थापनेचतुर्दशीवेधो
त्रियोगिन्यांग्राह्ये दूरमपिहेवामेव इतिवर्तुशी अनंतव्रतेतु त्रिमुहूर्तव्याप्तेपूर्वेकव्यापिनीग्राह्या दिनद्वयेतथात्वेपूर्वेवसंपूर्णव्याप्तौ दिनद्वयतदव्याप्तौ यत्र
कर्मकालपर्याप्तौसैव अन्यथापूर्वैव मध्याह्नेगणकाद्यनुरोधायेतेः शिवरात्रिस्तुवक्ष्येत इतिचतुर्दशी पंचदशीतु शुक्लाकृष्णाच सावित्रीव्रतातिरिक्त
सर्वत्रोपवासेपरविद्धैवग्राह्या सावित्रीव्रतेतु पूर्वविद्धैव शुक्लाकृष्णाच कन्यामकरमीनतुलामिथुनस्थे तुहिविधापि तत्तत्सुरस्कारविहितश्राद्धव्रतादौ रतिव्रता
दौचभरतविद्धैव अत्रपूर्वविद्धयोः कर्तव्यमपिसावित्रीव्रतं नतन्मूलत्वात्मकभूतविद्धयोर्नकार्यमितिमाधवः अन्यत्तु यत्रभरते विद्धा तत्रतावद्विद्धैवकार्या सावित्रीव्र
तंतावद्वैधर्मिकार्थं मेवेत्यर्थः इतिपंचदशी अथाममाक्षामी इत्यचपूर्णिमांतमासपक्षेभाद्रकृष्णाष्टमी सैवेतिपक्षेश्रावणकृष्णा साहिधा शुद्धा विद्धाव्रतत्रय
मीयोगरहिता शुद्धा तथातद्विद्धा अत्रारात्रिमानेतपि अहन्यावृद्धावितिमाधवादयः अत्रत्रिकालपूजाप्युक्ता तथाप्यर्धरात्रपूजा प्रधानमितिच अतएवार्ध
रात्रोऽत्रमुख्यः कालः मुख्यस्यप्रधानस्य कालइतिहेतोरितिसंक्षेपः असाधारण्येन निर्णायकत्वान्मुख्यः कालइत्यर्थः उपवासोप्यत्रप्रधानमितिके कृतसंस्कारतयांग
मित्यन्ये अत्रोभयोरहिणीमात्रयोगेजयंतीत्वमितिदाक्षिणात्याः अर्धरात्रेतयोगेजयंतीत्वमितिप्राच्याः जयंतीव्रतेहि उमेभिन्नं वेतितुनविचार्यं भेदवादिनोरुद्र
यसंनिपातेजयंतीव्रतेतु घनस्यवस्मृतत्वात् इतिकेचित् सर्वेहिविधाष्टमी प्रत्येकं त्रिविधा परदिनेसत्येदयेनेसति असतिचेति तादृश्यपि पुनःप्रत्येकंत्रिवि
धा रोहिणीसहितेतरहितेतु चेति तत्रशुद्धायांविद्धायांवरोहिणीसहितायांतद्रहितायांवा परदिनेसत्येदयेनरात्रमस्त्यादिवादएवनद्वितीयादिनेऽहन्यभिधीयते
शुद्धाधिकायांविद्धाधिकायांच अन्यत्रतत्रैवरोहिणीयोगयेवरोहिणीयुतासैवग्राह्या तेनपरदिनएवरोहिणीयोगनिशीथव्यापिनीमपि किंचबहुनाशुद्धामिश्र

नवमीशा॰ पूर्वसंस्कारपरेद्युर्ग्राह्या कचित् दृष्टादृष्टौ शुक्लविषयेपूर्वेद्युरेवव्रतमाचरंति तदा॰ अष्टमीमात्रमिश्रेण रोहिणीयोगस्य मुख्यतया निर्णायकत्वेन संदेहेऽपि निशीथस्येतेन
पिसंदेहेनवमीयुक्तत्वादेर्वा निर्णायकत्ववदंतः कचित् अर्धरात्रस्यैव मुख्यो निर्णायकः रोहिणीयोगस्तु तेननिर्णयासंभवे निर्णायकः॰ शुक्लायांतु संदेहाभावान्नास्यप्रवृत्तिरि
त्याहुः तन्मते तादृशशुक्लविद्धाविषयेच पूर्वदिनव्रतं शिष्टाचारोप्येवमेव भवतु वा विद्धेऽविद्धाविषये यथाश्रुत शुक्लाविषयेतु पूर्वत्रैवानुष्ठानं युक्तं यत्तु शुक्लाधिकं
पूर्वदिने निशीथेतद्धटिकाद्वयंवा रोहिणीयुक्तं परदिनेच रोहिणीयुक्तदिनद्वयेवा रोहिणीरहितासु पूर्ववोपोष्य यत्तु विद्धाधिकं यत्तरदिनएव निशीथे रोहिणीयुक्त
तेवोपोष्या विद्धाधिकायांदिनद्वयेपि निशीथे रोहिणीयोगपरेव तत्रघटीद्वयस्यार्धरात्रव्यापित्वेसम्यगेव तदभावे आद्यंतार्धघटीद्वय व्याप्तिर्ग्राह्या तत्रसमेति
द्वयेपूर्वार्धावसानेऽपरार्धघटीयोगः नवमीयुतायामर्धघटीयोगः पलद्वियोगस्तु नदुष्टत्वेनिर्णायकः विद्धाधिकायांदिनद्वयेपि निशीथंविहाय रोहिणीयोगोऽनेकः
प्रकारैः पूर्वेद्युर्निशीथार्धप्रवृत्तयोस्तिथिनक्षत्रयोः परेद्युर्निशीथादर्वागेव समाप्तौ सत्यांपूर्वेद्युर्निशीथादर्वा गवप्रवृत्तस्य परेद्युस्तस्मादर्वाक् समाप्त्या तिथिमात्रस्यवा
तथाप्रवृत्तिसंभवात्सु परत्रैव व्रतं तृतीयप्रकारे कचित् पूर्वत्रव्रतमिच्छंति दिनद्वयेपिनिशीथव्यापिनी पूर्वेद्युरेव रोहिणीयुक्ता यदि तु दिनत्रयेव कचिन्नवीद्वारविद्धा पूर्वा मिछंति
तन्मान्याः यदिदिनद्वयेपूर्वार्धरात्रादन्यत्ररोहिणीयुक्ता परेद्युरेवनिशीथव्यापिनी सम्पद्यतेव तथाविद्धाधिकादिनद्वयेपि रोहिणीयोगरहितासापि त्रिधा अन्यतरत्रैवनि
शीथेवर्तमाना दिनद्वयेपितादृशीति॰ दिनद्वयेपि तदस्पर्शिनीवेति तत्राद्यया तादृशी साग्राह्या अंत्यया ऊनत्वेनैव वेधवत्त्वात् अर्धरात्रव्यापिनीमपि रोहिणीयुतां
पित्रादयोविद्धांपि स्वस्वनवमीयुतैवग्राह्येति नासिंहोपरिचर्या धनुर्यायिनः अस्यानवमी मुधसोमान्यतमयोगेन प्राशस्त्यं पारणंतु केवलास्योपवासपारण
दिने भक्ष्यभोजनवृत्तेस्तदंते द्वार्यं रोहिणीयुक्तोक्तमुपवासपारणादिने पुनर्यानुकूलेतु उभयोक्ते तदपि यदिसार्धयामार्वाक् तदेकयामात्मक महानिशातारंभगभयांतप्रती
क्ष्यामेजनवृत्तालोलुप्यते तदातु तादृशेकाले उभयंतु नलभ्यतेतदैवतरांतएव यदातुमहानिशाऽव्यवहितपूर्वक्षण एवैकतरस्यैवांत तदा महानिशायामपि तद्दिने हेमाद्रिः तदा
दिनएवेतिगौडाः इत्थंवयंतु अशक्तस्यतत्कालांतएव इदंचनित्यं काम्ये एतदकरणे प्रायश्चित्तं तु प्राणायामशतं अधिकं प्रतिनिधिरुक्तः एकब्राह्मणभोजनं सहस्रसंग

यत्रीजपोवा द्विगुणान्नदानंवा दशसहस्रप्राणायामोवा काम्यमेवनित्यवदोधकसंज्ञिधर्मूलः आरब्धव्रतंत्रतिवा नित्यवद्बोधकादुत्पन्ने इतिनन्नाहुर्मी अर्थैकादशी अत्र
वेचिते सर्वैः शुक्लैः शुक्लायांच कालमात्रकेदेनसकलदिनीयाथवकरणसाध्यमेव भोजननिषेधस्मृतेः अस्यांभोजननिषेधोनित्यएव नित्यंकाम्यंअ
होरात्रावच्छिन्नाभोजनसंकल्पस्वरूपंव्रतंचात्र तत्रोभयारेकदिनेप्रसक्तौव्रतानुष्ठानेनवानिषेधपरिपालनेनेतिहि तत्रनिषेधपक्षेदुर्बलेपि सर्वेषामुपनीतानांमृधो
कार्यः व्रतेतुपक्षेदुर्बलेतपि नित्ये गृहस्थस्यैव व्यतिरिक्तानांतूपनीतानांबालवृद्धस्त्रीणांचशुक्लायामेव श्वश्रूवोधनीमध्यवर्तिकृष्णासुच पुत्रवद्गृहस्थस्यैतुतास्वपि नोपवासइतिहारीतादि
सूः श्वश्रूवोधनीमध्यवर्तिन्यासुतस्यापिकाम्यंतेसर्वगृहस्थेनापिकृष्णायांकार्यमेव वक्ष्यमाणलक्षणोवैष्णवेः पुत्रोविद्धेपि नित्यव्रतेकृष्णाप्यमे
कार्यमेव यत्तुरविवाग्दोषात्रवृद्धकृष्णेनोपवासपरेणायोक्तंवैधः सतद्विनैकस्य नतदधिकरणेकृष्णेप्यपि निमित्तकस्यापि पारणमपि शनिवाराद्युपवा
सांगकृतंरवारादिप्राप्तनिषिध्यतेतेनापितदंगोपवासनिषेधवद्बोध्यः व्यतीपातश्राद्धेतूपवासनिषेधस्तु काम्योपवासविषयः निहाजतोसस्य
श्राद्धदिनप्राप्तौतुतथापितसंविता धारणमात्रंकार्यमित्यादिः अन्यत्रभोजननिषेधस्मृतिरपिव्रतपरैव तद्विधेर्बाध्यत्वात् इदंचकाम्यमेव गृहीतेकादशी
व्रतेशनिवारतुनित्यं तस्यैवभागदोषश्रवणात् अतएववाराद्युपरागे सर्वास्वेकादशीष्वुपवासमभिधाय तदशक्तौचातुर्मास्यैकादशीषु तदशक्तौमास
द्वयेकादशीवतदशक्तौ एकस्यामपि नक्तंधनुर्यामेनेतिहि कृष्णेत्रापिपूजोक्तप्रधानं उपवासस्तदंगमेवेत्यादुः अत्रस्त्रीवर्तिकायाः पत्यनुरूपंवनित्यं
काम्यंवा व्रतादि विधवापि यदधीनातदनुरूपेवतस्याःपुण्यालंकारगंधपूपांजनदंतधावनतांबूलादिव्रतांगहेनविहितोसंवर्तिजोदर्शनेपवासतदंगनियमाश्च
स्वयंकार्याः पूजादिकमन्यद्वारा एवयाज्ञिकेवापि यत्तुतदंगमंतदानहोमादितदंतेस्वयमेवकार्यं वेश्यादारुयोर्दूरस्त्राधिकंकालंप्रतीक्षणं अत्रसर्वत्र
ध्यसाधनेनोपवासेमुख्यः तदसामर्थ्ये क्रियानुकल्पः सचपंचगव्याज्यनक्तक्षीरेतिकृच्छ्रकालोदनहविष्यान्नेनानि पूर्वेपूर्वाभावे ओदनशब्देनभ
क्ष्यभोज्यलेह्यचूष्यं त्रिविधंगृह्यते भक्ष्यं रोटिकादिःभोज्यमन्नंसक्तवादि लेह्यंगुडौदनादिः चूष्यंतु एवंचतुर्विधंगृहीत्वायत्किंस्यातत्तेन एवंचतुर्विधशाकः नोदनमिश्राकुंप्रोक्ताः॥ ॥

नागेश

६

मेवेत् भवतु तेषामपि पूर्वैवेति तेषामाशयः निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदेत्येतन्मतमूलभूतं वचनं निष्कामस्त्वगृहीति माधवानुयायिनः पठंति अगृही पदव्याख्या
नेहैव व्याचक्षीत यत्तु ईदृशीमुपक्रम्य उपोष्य द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति वचनं तन्तिथिद्वयसंबंधो यथा भवति तथोपवासः कार्य इत्यर्थकं तयोरुत्तरोपवासविधा
यकमेव विष्णुप्रीणनतत्परैरिति च प्रायो यत्यादीनां तथात्वात् तदुपलक्षणमेवेति माधवानुयायिनः अन्ये तु तत्कामानामेतद्बलान्नैरंतर्येणोपवासद्वयमिच्छंति अथ विद्धा तत्र
एतावत्तदुक्तसंबंधरीत्या विद्धाधिकाधिकद्वादशिका सा सर्वैः परैवोपोष्या यातु विद्धानधिकानधिकद्वादशिका तस्यां वैष्णवानां शुद्धद्वादश्यामुपवासस्त्रयोदश्यां पारणं अ
न्येषां यतीनां गृहस्थानां च विद्धायामेवोपवास इति माधवः अन्ये त्वेकादश्यां न्यूनत्वरूपक्षये माधवोक्तैव व्यवस्था तस्यामेव तु गृहिणां पूर्वेद्युः यतीनामुत्तरेद्युः द्वितीयसूर्योद
यपर्यंतत्वं साम्यं ततो न्यूनत्वक्षयः किंचिदक्षयविषयेपि अपुत्रगृहिणामेव विद्धोपवासः पुत्रवद्गृहिणस्तु परदिन एव तेषां त्रिस्पृशायां उपवासनिषेधात् साम्यं तु तेषामपि पूर्वत्रैवे
त्याहुः मदनरत्ने तु विद्धन्यूनायामपि मुमुक्षूणां परेद्युरुपवासः पूर्वविधायकवाक्ये यतिपदं तु नियमयुक्तं मुमुक्षुनैष्ठिकवानप्रस्थादिपरमित्युक्तं हेमाद्रावप्येवमेव यातु वि
द्धाधिकानधिकद्वादशिका सा सर्वैरपि परैवोपोष्या साम्यक्षये चेत्येके माधवस्त्वत्रापि [illegible] स्मार्तविषये गृहियतिव्यवस्थामाह शुद्धाधिकावत् यातु विद्धानधिकाधिक
द्वादशिका तस्यां वैष्णवानां द्वादश्यामेवोपवासः अन्येषामपि तत्रैवेत्यलं गौडास्तु यतिरेव वैष्णवे तेन सर्वत्र गृहियतिव्यवस्थेव वैष्णवस्मार्तव्यवस्थात्वेनाकार्या वा एवं च
विद्धा यतिभिः सर्वथा त्याज्या शुद्धाप्यन्यतरस्या अपि परत्र सत्वे इत्याहुः अत्र विद्धाकरणे पुरुषानिष्टमपि स्मर्यते पादकृच्छ्रमपि प्रायश्चित्तं तदरुणवेधो वैष्णवानां सर्वत्र
काम्ये इतरेषामपि नित्ये त्वितरेषां सूर्योदयवेध एवेत्येकादशीनिर्णयः गौडमते तु विद्धाधिकाधिकद्वादशीविषय एव तत् विश्वरूपनिबंधे तु शुद्धा त्रेधा तथा वि
द्धा भेदैर्न्यूनसमाधिकैः प्रत्येकं च पुनस्त्रेधा द्वादश्यूनसमाधिकैः आद्यास्तु षट्सु पूर्वैव व्यवस्थानंतरद्वये गृहमेधियतीनां च नवमी तु परेहनि आद्यास्ति
स्रस्तु पूर्वासु व्यवस्थानंतरद्वये अपरेहनि शेषस्तु सप्तमी च व्यवस्थयेति वल्लभाचार्योपि शुद्धा विद्धा तथा त्रेधा भेदैर्न्यूनसमाधिकैः प्रत्येकं द्वादशी वृद्धि
साम्यह्रासैः पुनस्त्रिधा तत्रैका द्वादशी वृद्धिसाम्यो नतागुणैः आद्योपोष्या परेद्वेद्वे पौर्वापर्याद्व्यवस्थिते गृहियत्योरुत्तरासु षट्सु पूर्वैव संमताः तिसृ
ष्वंत्यासु विद्धैव तत्पूर्वे तु व्यवस्थिते अविद्धैव तु शेषास्तु तृतीया तु व्यवस्थितेति विष्णोः शयनपरिवर्तनप्रबोधोत्सवाः क्रमेण षाढभाद्रकार्तिकशुक्ल

६

कादशीषु कार्या इति मात्स्ये तत्र निशि स्वापो दिवोत्थानं संध्यायां परिवर्तनं एष्वेव मासेषु शुक्लद्वादशीषु शयनादिकं वाराहे उक्तं द्वादशीषु रात्रौ संध्यायां दिने
चानुराधाश्रवणरेवतीनामादिमध्यांतभागयोगास्तेषु शस्ता यदा तु द्वादश्यां रात्र्यादिभागेषु तन्नक्षत्रांशयोगे तत्तद्द्वादशीनक्षत्रमात्रसंयोगोपि तत्तत्का
लगतो ग्राह्यः यदा तु द्वादशीषु नक्षत्राण्येकदेशेनापि न भवंति किंतु पूर्वापरदिनयोस्तदा तत्रापि तत्तदृक्षभागयुक्तकाले निशाद्यनादरेणैव एवं च द्वादश्यां
निशाद्यादरे अन्यतिथौ तन्नक्षत्रभागयोगादरे नियते सति यदा द्वादशीषु निशादेरन्यत्र तत्तदृक्षभागयोगोऽन्यतिथौ च तदितरनक्षत्रभागयोगस्यैव
तदा द्वादशीष्वेतत् परं × भ × तु सायंसंध्यायां त्रयं केचित्तु दिनत्रयेपि ऋक्षाणामसंभवे द्वादश्यां संधिसमये उक्तविषये तु तत्तत्काल एवानुष्ठानमाहुः द्वादश्या
मकृतोत्सवेन त्रयोदश्यादावपि कार्यं तेषां गौण × मेव × कालत्वात् ये पौर्णिमायामेवांगीकृतशयनोत्सवास्तैस्तत्रैव कार्यं केचित्तु ऋक्षयोगस्य द्वादश्यामभावे
पि तत्रैव प्रबोधः ऋक्षस्य प्राशस्त्यार्थत्वात् तिथेरपि रात्रावसत्वे त्विवेव द्वादश्यां दिने रेवत्यंत्यभागे योगे न दिने तृतीयभाग एवोत्थानं दिवापि ऋक्षयोगाभावे सं
ध्यायामेव द्वादश्यां त्रयोदश्यादौ तु गौणकाल एवेत्याहुः केचित्तु शयनीव्रतं दिनत्रयसाध्यमाहुः अत्र पारणायां तेषां नक्षत्राणामादिमध्यांतभागा वर्ज्याः
यदा तु स्वल्पा द्वादशी वर्ज्यऋक्षभागयुक्ता च तदा द्वादश्यामेव पारणमिति आधुनिकाः चातुर्मास्यव्रतारंभोप्यासु हीदृशीषु तदुत्तरपौर्णमासीषु कर्कसंक्रांतिदिने वा यदा
कदा वारंभे समाप्तिः कार्तिकशुक्लद्वादश्यामेव पौर्णमास्यां वा शयन्याद्युत्सवः चातुर्मास्यव्रतारंभो गुरुशुक्रास्तदावपि मलमासे तु नेति वक्ष्यते इति शयन्यादिनिर्णयः
अथ श्रवणद्वादशी द्वादश्या अल्पश्रवणयोगेपि तत्प्रयुक्तमुपवासादि भवत्येव न तूदयास्तान्यतरपर्यंतत्वं तद्योगस्योपेक्षितत्वं तत्र यातावदेकदिन एव श्रवणयोगस्तदैवैकादशीयु
क्ता ग्राह्या अयमेव विष्णुशृंखलयोगः तत्रैणचोभयमुपवासद्वयं तत्रापि तिथिद्वयस्य श्रवणस्पर्शेऽतिशस्तत्वं केचित्तु रात्रेर्द्वितीयप्रहरादौ श्रवणयोगः परदिन एव वोद
यिककालिकस्तदापरः पूर्वदिनेप्युदयकालिकस्तु पूर्वैव यदा तु एकादश्यामेव श्रवणयोगस्तदा तस्यामपि एतत्प्रयुक्तं व्रतं कार्यं सत्यपि बुधयोगे द्वादश्यां न कार्यं एकादश्यां विद्धा
धिकत्वेपि उत्तरदिने श्रवणयोगाभावे दशमी विद्धापि सा कार्या तत्र येषां तस्यामेवैकादश्युपवासस्तेषां तंत्रेण द्वयं अन्येषां तूपवासद्वयं पूर्वव्रतांगं पारणस्य बाध एव
अद्भिर्वा तत् यस्तु प्रक्रांतश्रवणद्वादशीव्रते उपवासद्वयासामर्थ्यान्निश्चयात् कृतैकादशीसंकल्पः पश्चात्तत्रासमर्थः स संकल्पितं विधाय श्रवणद्वादशीप्रयुक्तं पूजादिमा

जंविधायमुं जीत यस्तूभागेव निश्चितोपवास दृश्यासामर्थ्यः सश्रवण द्वादश्युपवासमेव कुर्यात् तद्युतपारणंतु पारणादिने दुर्भिक्षानुद्दिनो उभयांतदृतिमुख्यः कल्यः अन्यतरांतो
गौणः यदातु विद्धश्रवं रवल तिथ्यपेक्षया नक्षत्रमधिकं पारणा ति थो तदा द्वादश्यामेव पारणेति के चित् अस्यां संगमस्नानं महाफलं एवं पुनर्वसु पुष्ययोर्हणो युत द्वादशी च्युपवा
सेमरु कुलः तस्मात् अस्तमयपर्यंतं उदय प्राप्य द्वितीयोदयपर्यंतं अक्षयोरे वायाद्यः इतिश्रवणा द्वादशी अथशिवरात्रिः त्रयोदश्यां घटीनव कादशीन कुछ चतुर्दशी अत्रोपवा
जाद्यधाने उपवासस्यागदर्शे ग लिखेके तेपिप्रधानमित्यन्ये उपवासएवप्रधानमिति गोडाः दृदिनसंकाम्यंच भवतितिथिद्वये धर्मत्रयव्याप्या निर्णयः तस्मात्तावेव कालसाद्
अर्द्ध रात्रो अत्रापि जन्माष्टमी वदेव तत्रनिशीथाद्ध मप्यनुवर्तमाना याग्रचोदश्यामुक्ता चतुर्दशी परदिने निशीथे योगिनी अपिपरेद्योप्याह्या एतादृषमाघ्ये वप्रदोषे
व्यापिनी ग्राह्यतोधर्म वृद्धानादिति यादृपूर्वेद्युरेवनिशीथयोगिनी साधवेव यादृद्दिद्यपेयातादृशीसापिपरेतिमाधवः सापिपूर्वत्र अन्ये यादृपरदिनएव तादृशीस
परेव यदापूर्वदिने निशीथेकदेशव्याप्तिः परदिनेचसंपूर्णा तदाप्यसदापिपरेव अस्या दृविधोमान्यतरयोगे प्राशस्त्यं तत्रापिशिवयोगयोगे प्रशस्ततरत्वं एकवा
सरे १३ १४ २० रुपतिथित्रय युक्तापिप्रशस्ता पारणं तिथिमध्य एव तत्रासंभवे तिथ्यंतएवेयके विपरीतंपरे माधवस्तु यामत्रयोर्ध्वगामित्वंप्राह्यं रेवतिपा
रणेप्राहु एवंप्रतिमासं कृष्ण चतुर्दशीषु क्रियमाण शिवरात्रिव्रतेपि अयमेवनिर्णयः रात्रि व्याप्तिसाम्यंतु परत्रयामेवेदं रुद्रव्रतानां संभूरवीतिथौ कर्त्तव्यत्वात्
संभूरवी सायाह्न व्यापिनी केचिन्नक्तं सायाह्न व्यापिनीतिथेनिर्णयंवदंति कुचित् प्रदोषव्याप्येव कृतिशिवरात्रिः अथैकभक्तं तच्च द्वितीयभोजनांता
वधिशिष्टभोजनं अत्रब्राह्मो ग्रासा मुनेर्भक्ष्याः बोडशग्रण्यवासिनः द्वात्रिंशत्तु दृष्टफलसंख्या मध्य ग्रासत्रयं न्यूनंतु जनमधिनियमः अन्येनिय
मा व्रतसामान्योक्ता अपित्र अस्यमुख्यकालस्त्रेधा चतुर्धा पंचधाविभागेन व्रह्मादः आवर्तीमानोपरितनो मध्याह्नोत्तरभागः सर्वापि त्रेधाविभागेनैवव्रा
ह्मादन्ये पंचधाविभाग उक्तएवसत्ये तदुनरोत्तमयावधिगौणः यादृअन्यतरदिनएव मध्याह्नोत्तरदलव्यापिनी तदेवदेशव्यापिनी वास्यवग्राह्या
दिनद्वयेपि तद्व्याप्तौ तदस्पर्शेसाम्येत्तदेस्पर्शेत्रिपूर्वैव गौणकालव्याप्तेरधिक्यात् मुख्यकालेतिथ्यभावेपि अनुष्ठानं मुख्यकालेएव अत्रोक्तरीति
श्चेत्समानषष्टिघटिकापेक्षया यादान् × कदेश× ह्रासो दृष्टोवा स पूर्वतिथौ हीनःकार्यः अक्षेप्यश्च तत्रदृष्टिक्षेपः पूर्वदिने कर्मकालसंकल्पप्रतिपादनाय
हेमाद्रि स्तु दिनद्वयमध्याह्नव्याप्तौ युग्मवाक्यात्रनिर्णयमाह तद्व्यामिश्रत्वे वैषम्येण मुख्यकालेकदेशव्याप्तावधिकत्व छत्वापिनी ग्राह्या अंगमिश्रतेमु

केतुप्रधानकालनिर्णयेनैवनिर्णयः तत्रमध्याह्नस्पर्शधानेनव्याप्तौ गौणकाले तत्कार्यः उपवासप्रतिनिधिरूपंतु उपवासयोग्यतिथौ मध्याह्नोत्तरदलेकार्यं
दृसेकभक्तं अथनक्तं दिवाभोजनाभावाभावविशिष्टरात्रिभोजनंहितत् तत्रप्रदोषव्यापिनीतिथिः एकादशी प्रयुक्तं नक्तं तूदयव्यापिन्यां प्रदोषस्त्र
स्यास्तोत्तरत्रिमुहूर्त्तीसकः दिनेसमुहूर्त्तो गौणः कालः तस्यूर्ध्वंव्यापिमुहूर्त्तद्वयं गौणतरः कालः मुख्यकालेप्यर्धमुहूर्त्तद्वयं मुख्यतरं मैथुनाहार
स्वाध्यायादिषु वर्ज्यः संध्यातु नक्षत्रदर्शनपर्यंतेव संध्यागर्जिता दावनध्यायप्रयोजिकातु घटीत्रयात्मिका रविवारादौ रात्रिभोजननिषेधस्य रागप्राप्त
विषयत्वात्तत्रापिप्राप्तं वैधंनक्तभोजनं मुख्यकाल एवकार्यं एवंचारुवारादिनिषेधेघटीत्रयं संध्याग्रहणेपिनक्षतिः निषेधस्य रागप्राप्तविषयत्वात् माधवस्तु
रविवारादौ नक्तमुक्त गौणकालएवेछति सूर्यदेवसनक्तं तत्तु गौणकालएव एवं तिथिवाधिकारिकमपि नक्तं गौणकालेदिवैव यात्यन्यतरदिनेएव कर्त्तव्यं
नैकदेशेनवा मुख्यकालंग्रासीतिसः सेवदिनद्वयेपि प्रदोषव्याप्त्यभावेदिनद्वयेपि प्रदोषस्पर्शेनीचपरा भोजनमपितस्यांसायाह्न एव दिनद्वयेवि
ष्येनवैषम्येणवा तदेकदेशस्पर्शेन्युन्नेव दैवम्येण व्याप्तौ यदि पर्वदिनेभोजनदेवपूजा पर्याप्तमधिकंवा तदा पूर्वा अन्यदापरेतिविशेषः एवंसौरनक्तेयति
नक्तेचसायाह्नव्याप्त्यानिर्णयः एवमेवगोवत्सद्वादश्यादौ नक्तव्रते अन्यांगे उपवासप्रतिनिधौचतादृशेव भक्तन्याये यमेवनिर्णयस्तत्कालविहितपूजादा
वपितिथिद्वयप्रयुक्ते कथंनक्तकारेदिने ग्राह्यातु पूर्वाराध्यैवाहुः पूर्वातिथिप्रयुक्तं मुख्यकालत्वेनकार्यं इतरंतु उत्तरदिने गौणकालत्वेनैव उत्तरदिनेचय
मेवकार्ये असंभवेतु तस्मिन्नेवदिने कर्त्तव्येतरेण कोरणीये अयमेवन्यायो नक्तातिथिव्यापिपूर्वाराध्यव्रतांतः पातिनि तद्विरोधेकतिथिव्रतेपि ग्रासनियमस्त्र
त्रद्वादशी पंचदशी छविंशतिर्वेति यथाशक्यं इतिनक्तं अयाचितंतूपवासस्तूदेशरात्रस्याध्यर्द्धादहोरात्रयोगिन्यो कार्ये यदातु तिथिरेकत्रदिवैव परत्रा
वोवदतदाऽहर्व्याप्तिन्यं संभावितपक्षोत्तरेपूपवासवदेवनिर्णयः अयाचितं चयदैवेऽभ्यते दिनेरात्रौवा तदेवातिथिकालेसकृदेवभोक्तव्यं अलाभेनोपवासे
पिनक्षतिः अहर्मध्यादयाचितमित्यादिनाधिरागप्राप्तेभोजने याचितमित्यनुवादेनाधिक्यविरोधोनिरस्यते याचितमित्यंचतादृशंपरकीयमेव अतएवाह्यादि
दिनेप्रारब्धमासादिव्याप्तिचतुर्थकालिकव्रतानुष्ठाननिमित्तभोजनाकरणं दृश्यते ग्रासनियमोत्रचतुर्विंशतिः बोडशेति यथाशक्यं दृसंख्याकोदेश्या
चितं

अथोपाकर्म तत्र श्रवणेदिनेऽश्रवणे वा सिंहस्थेऽश्रवणेऽनुदये: सोदिशुक्लपक्षादावेव तस्य ग्रहणसंक्रांत्यादिदुष्टे सूतकादिसंभावनायां वा तन्नाशेऽशुक्लपंचम्यां हस्तयुक्तायां केवलायां वा हस्तदुष्टदिनांतरे वा कार्यं अदुष्टेऽपि दिनेऽपराह्णव्याप्तेऽश्रवणे श्रवणाद्यसंभवे भाद्रपदशुक्लपंचम्योः श्रवणपंचम्योः कार्यं एवं श्रावणश्रवणस्थगुरुरविक्रांतादावपि तत्रैव प्रथमोपाकर्मनिषेधात् तत्रापि यथासंभवं श्रावणपंचम्यादि भाद्रपदश्रवणपंचम्यादौ वा एवं सिंहस्थगुरुरविक्रांतिचारयोरपि प्रथमस्थनिषेधः मलमासादौ तु द्वितीयादेरपि यदुक्तदिनात् श्रावणीपूर्णिमा मुख्या तत्रासंभवे यत्रांगत्वेऽश्रवणहस्तपंचम्यो र्युक्तेतरयोर्वा तत्राप्यसंभवेभाद्रपूर्णिमातदुक्तपंचम्योर्वा यत्रानयोरेकेतरभाद्रपदी यत्रैव कार्तिक्यां तु श्रवणासंभवे श्रवणपूर्णिमास्यां हस्तयुक्तपंचम्यां वा तदभावे प्रौष्ठपद्यां. बोधायनानां तु श्रावण्या ग्रहणादिदुष्टेऽभावे तु भाद्रपद्यामेव एवं बहूक्तेषु युक्तेषु च मुख्यं मुख्यकालसंभवेन स्वसूत्रोक्ता अन्येऽपि काला ग्राह्याः केचित् संक्रांतिग्रहणाद्यपि प्रथमोपाकर्मण्येवनिषिद्धमाहुः एवं श्रवणादीनां संक्रांत्याद्यधिकरणेत्वेवदुष्टं तद्दिनेऽदुष्टं तद्दिनेऽदुष्टनक्षत्रांतरे तिथ्यंतरे वा संक्रांत्यादौ नतत्रेदुष्टमितिकेचित् यद्दिने संक्रांतिश्चादिनसंबंधिनोदुष्टमित्यन्ये सामगेस्तुसिंहस्थे रवौ हस्तनक्षत्रे कार्यं यस्यां कस्यांचिन्निशीथो तदप्यपरेऽहन्येव अन्येषांतु दैवज्ञात् पूर्वाह्णएव तत्रान्यादिसत्वे श्रावण्यांतु उपाकृत्वा भाद्रेऽह्नि हस्तर्क्षयुतं नपठेयुः एषामत्रमासतिथिवेधश्रा द्धएव द्वितीयादितु मलेमासेऽपि आथर्वणानांतु श्रावण्यां भाद्रपद्यांवा वैकया मुत्सर्ग इति ग्रहसंक्रांतियोगे अथ यद्दिनेउपाकर्म तद्दिनार्धरात्रात्पूर्वं मेवतन्नक्षत्रतिथ्योर्विद्यमानएव तयोर्दूषकः नतुतत्परस्तात् तथाऽतीतार्धरात्रात्परतोविद्यमानोदूषको नतत्पूर्वकः अर्धरात्रश्चेन्नात्र रात्रिपूर्वार्ध ग्रहणं अत्रहस्तश्रवणपर्वणां खंडेऽौदयिकानांग्रहणं तदपिसंगवस्पर्शेयेषांतु त्रिमुहूर्तेसंगवः प्रातःकालमात्रसाध्यं उपाकर्म तेषां संगवास्पृष्टस्य पीतिकेचित् अपराह्णोपाकर्मिणां सामगानां तत्कालव्यापि पूर्वहस्तंबाधित्वोत्तरदिनएवापराह्णे तदनुज्ञानं हेमाद्रिस्तु तैत्तिरीयाणामेवोपाकर्मेति दार्धिकेपर्वणि अन्येषांयाज्ञवाणांतु पूर्वविद्धएवपर्वणीत्राह नर्मदो नरभागे सिंहयुक्तेर्के कार्यं तादृक्षपोतु कर्कस्थेर्के इति तुनिर्मलं इदंचग्रहणोपाध्ययनोत्सर्गतयाचोदृश्यं अत्रसंदेहे यदाब्राह्मणैः बहुभिः सहकरोति तदा लौकिकाग्नौ कार्ये एकश्चेद्घाग्नौ कुर्यात् इत्युपाकर्म ॥

श्रावण्यंशस्तावधिः उक्तः सपूर्वविद्धायांमतिकेचित् उदयव्यापिन्यांकार्यइत्यन्ये सचभद्रायांन उपाकर्मतुभद्रायामपि इतिरुद्रावधिः अथोत्सर्जनं तच्छ्रवणेनाध्यायमुत्सृजेत् बौधायनेन पौष्यामपि इंदुक्षणमासाध्ययनाभिप्रायेण तत्र श्रावण्यामुपाकर्मणि माघ्यां आषाढ्यां तस्मिन् पौष्यां सार्धपंचमासाध्ययनपक्षेतु मघात्रावण्यामुपाकर्म तदा पौष्यप्रतिपदि तदामाघश्रवणेतु प्रतिपदि यदृक्षत्वेनतु पौषकृष्णाष्टम्यामुक्तं यथा चारंभवस्तु. सामगानांसिंहस्थे रवौ पुनर्नक्षत्रे यदासिंहस्थे रवौ हस्तात्पूर्वं कर्मस्थे तदा तत्रैवोत्सर्जनं तेषां सर्वेषामुपाकर्मदिनएव ततःपूर्ववा एतच्चकालाःखंडेऽौदयिकाग्राह्याः इदं नीतुशिष्टा उपाकर्मदिनेएवपूर्वमुत्सर्जनमाचरंति इत्युत्सर्जनेनिर्णयः अथनानातिथिसाध्यव्रतनिर्णयः तानिद्विधा केषुचिदेकंकर्मप्रधानं उपवासपूजाध्यात्मकं नानातिथिव्याप्यते क्रमेणएवहचापूर्वेद्युः तत्रसर्वतिथीनां प्रधानकालएव केषुचिदंगतिथिकृत्येवप्रधानं तत्राद्ये स्वातंत्र्येणैव तत्कर्मयोग्यतावतितिथिर्निर्णयःकार्यः तस्मिंश्चक्रियमाणं कुत्रचित्तिथ्यप्रयुक्तस्यतत्रैणानुष्ठानात् कुत्रचिदेकतिथित्रयुक्तस्याहृयानुष्ठानात्सकलं व्रतत्रयोगस्य न्यूनाधिकसाधनत्वेपिनक्षतिः यथा नक्तव्रतेवटपूर्णिमादि त्रिरात्रादौ आद्यविधेपि अंत्ये वांत्यमतिथिं निर्णीय तदनुरोधेनैकदेशवर्तिनीनामपि तदव्यवहितपूर्वतिथीनां यावदुपलक्षणग्रहणं नतुतासां स्वातंत्र्येणनिर्णयः कार्यः तत्राद्यविधानेयं त्रांतिमतिथिर्निर्णीयो पजीव्यतत्त्वप्राधान्यद्योतकं समारब्धाधिक्षिति तत्रैव यथावटपूर्णिमादौ अर्थेरात्रप्रतिपत् तत्र नवरात्रंतु कर्मकर्तव्य इत्यादौ नवरात्रारंभा गुणविधीतिकश्चित् कर्मनामधेयमित्यपरे अत्रपूजैवप्रधानं उपवासस्नपनबलिदानहोमादिस्तंगं उपवासासामर्थ्येननक्तेकभक्तं वायोचितान्यन्नकल्याः इदंनिस्कृष्यं तत्रापिरात्रिपूजैवप्रधानं अत्रस्त्रीशूद्रकर्मादीनामधिकारः एषामत्रत्रिकेवपूजा जपहोमादिब्राह्मणद्वारासमंत्रकपूजावा तत्रैव तद्विप्राणां जपे यत्तु निर्णयसिंधौ माघभक्तबलिदानकूष्मांडेक्षुदंडादि बलिदानंभगवतीमाहात्म्यपठनरूपायांसात्विक्यामेवाधिकारः जपयज्ञादिविशिष्टबलिदानसात्विकयोर्दानपशुहिंसादिरूपराजस्यांक्षत्रियवैश्ययोरधिकारः मंत्रहीनतत्समासाघपहारादिविशिष्टतामस्यां स्त्रीशूद्रकर्मादीनामधिकारः द्विजस्त्रीणांत्वमंत्रसात्विकयोरेवसः स्त्रीशूद्रादिसिद्धरूपसावित्र्यादीनां देवीमुद्दिश्यमनसोत्सर्गःकार्यः अत्रप्रतिपदमारभ्यनवमीपर्यंतं कार्यमितिमुख्यःकल्पः तदसमर्थप्रतिपत्सप्तम्यादिदिनत्रये तत्रापि व्यस्तार्थेऽष्टमी नवम्यौ प्रतिदिनंक्रमेण तृतीया मारभ्यसप्तरात्रं पंचमीमारभ्यपंचरात्रंवेत्यपिपक्षौ पंचरात्रपक्षे पंचम्यामेकभुक्तं षष्ठ्यामक्तं सप्तम्यामयाचितं अष्टम्यामुपवासः नवम्यांपारणमित्यपिपक्षौतत्र सर्वत्रासामर्थ्येकेवलाष्टम्यामपि अष्टम्यामुपवासेऽपुत्रवतोनिषिद्धः तेननक्तादिनानुकल्प एवकार्यः केवलनवम्यामपि

पूर्ववासरपूर्वकपूजोक्ता अन्यत्र षष्ठ्यादिपक्षेऽप्यन्यत्र · तत्र षष्ठ्यां बिल्वे शारदां देवीं बोधनं सप्तम्यां तदाहरणपूर्वकं तस्यां पूजा अष्टम्यां पुनरुत्थाप्य पूजा नागेश
महानिशबलिदानं च नवम्यां प्रभूतबलिदानं च दशम्यां विसर्जनमिति प्रकारः इत्थं पूजा मुख्यनवरात्रकल्पेऽपीत्यत्र स्थाप्यादिके अन्यद्वारा पूजा तत्रत्र नाम
त गुरुभ्रातृभार्याभगिनेयमहिष्यः मुख्याः इतरप्रतिनिधौ तु दक्षिणादानं च कृत्वा न्यूनफलता राजपुरोहितात्मावपि आरभ्यान्तरमंतरा शेषं च पा
तेसकल्पितद्रव्येणान्यद्वारा पूजा पूर्वमाश्विनशुक्लप्रतिपदारभ्यैव नृपतेस्वाशौचमध्येऽपि पुरोहितेन स्वीयशुद्ध्याशौचेऽपि पौष्टिकादि कार्यमेवेति प्रायः विस्तर
पूजाऽऽदौ गंधपुष्पधूपदीपनैवेद्यरूपपंचोपचारैः कार्या तस्याप्यभावे गंधपुष्पाभ्यां तोयमात्रेणवा भक्तिमात्रेवा अत्रप्रतिपान्निर्णयः अत्रेद
चित् अस्मन्नवव्रतेतु सप्तमीप्रतिपन्नवव्रतवन्निर्णेतव्या तत्र पूर्वदिने प्रदोषव्याप्तौ पूर्वा तद्विद्धायां त्वेवा माविद्धा विधायकानि द्वितीयाविद्धा निषेधकानि
निच इतरसर्वपक्षेषु परा तद्विद्धाऽपि द्वितीयाविद्धा विधायकानि अमाविद्धानिषेधकानिचेतिवदति परेतु दैवकार्यतासूर्योदयस्पर्शैककालत्वात्त
ध्यायेवनिर्णयं कुर्वंति यदातु प्रतिपत्पूर्वार्धा तदा आधघोऽशनाडीस्पृक्त्वापराह्णे कलशस्थापनादिपूजोपक्रमः अन्यत्रापि यथासंभवं हेमाद्रावेव
येषांनवव्रतं तेषांसायाह्ने एवतदुपक्रमः सर्वदा चित्रायां ध्रुवायामपि कलशस्थापनं नकार्यं सतिसंभवे तत्राप्याद्यात्रयं पूर्वाह्णव्याप्ति दुष्टं सर्वथा
सागरस्तंभेऽसिद्धिमूलैर्मध्यंदिने कलशस्थापनं चित्रायां वैधृतिनिषेधात्तु नीराजनांग कलशस्थापनविषये दर्शनन्यनक्षत्रवादिनो यदा पूर्वदिनेप्र
दोषाद्ध्वं प्रवृत्तौ परदिनेऽस्तात्प्रागेव समाप्तेसेव दिनद्वयेपि कर्मकालस्पर्शिनी तत्र पूर्वैव रात्रेरुत्तरकालस्य गौणकालव्यापित्वात् पूजोपक्रमं सत्रात्रापि
प्रदोषएवसेव्यः परेतुपरैव संकल्पकाले पूर्वाह्णमध्याह्नयोरश्रवणात् सायाह्नरूपगौणकालव्यापित्वाच्च रात्रिपूजाकालेपि यांतिथिमिसापाध
सा कल्पेन सत्त्वाच्च एवत्रया त्रिमुहूर्तदर्शयुक्ता ताम्बूलरक्ता द्वितीया विद्धा मुहूर्तमात्रायामपिपरदिने नवरात्रांतः के चाविद्धा सैव एवंचयदाऽमाविद्धा
हीना वैधसाध्यान्वितातदातस्यां नुपवासाद्यन्यतरत् देवीपूजामात्रकृता द्वितीयदिने यथायोग्यकाले कलशस्थापनं कार्यं येषांतु कुलपरंपरयेणा
माविद्धद्वितीयाविद्धयोरन्यतरस्यांगीकारस्तेषांव्यवस्थया तस्यामेवनवरात्रारंभः कार्यः तदभावे तूक्तनिर्णयानुसारेण द्वितीयातिमत सकलम्याादिदिनत्रयविहितप

त्रिकापूजायांसप्तम्यास्तु उदयव्यापिन्यः पूर्वैवतस्या विधानात् तत्रक्रमेण · ज्येष्ठामूलपूर्वोत्तरयोगे प्राशस्त्यं नतुतदनुरोधेन पूर्वविद्धाग्राह्यत्वं उभयत्रपूर्वाकालो
पस्त्रैव तदंगबिल्वशारदायां देवीबोधनं आश्विनशुक्लनवम्यामार्द्रायुतायां केवलायां वा तत्रपूर्वाव्यापिनी सा उभयत्रतद्योगाभावेऽर्द्रायुतायां पूर्वोक्तयत्कालेऽ
र्द्राऽलाभे तुतत्रापि नक्षत्राभावेतु नवम्यामेव पूर्वाह्णेऽभयत्रतद्योगलाभेचापूर्वस्मिन्नेवयुग्मवाक्यात् तस्यामसंभवे नवरात्रांतर्गतषष्ठ्यासायाह्णे आमंत्रणं
यद्दशमीविद्धायां सप्तम्यां प्रवेशपूर्वदिनेसायाह्णे षष्ठ्यभावेप्यामंत्रणं इत्थंच पत्रिकापूजा तिथिवृद्धिवशाच्चतुरहव्यापित्वेपि क्षयेऽहव्यापित्वेपि पत्रिकासंज्ञनंपू
र्वातिथिनिर्णयानुरोधेन यत्रैवदशम्यांयोग्यं तत्रैव श्रवणाष्टमी सानवव्रतत्ववादिनां प्रतिपद्वृद्धात्रिव्यापित्वेवेति पूर्वविद्धाप्राह्येति तथाप्युदयानंतरं नवमीहि
ने स्वल्पमपि विद्धमाद्यमष्टमी उपवासपूजाबलिदानादिषु दिवारात्रिकर्तव्येषु परैव अत्रनवम्यैकदेशेनैवसप्तमीवेधका किंतु स्वल्पेपि स्वल्पसंबंधेसत्यत्रापि मुहूर्तमा
त्रेऽपीति प्रामाणिकाः यदातु पूर्वदिने सप्तमीसप्तमीविद्धे नवमी नपरदिने तदापि विद्धैवसा यदातु पूर्वदिनेपूर्णाष्टमी परदिनेच नवमीविद्धा तदापूर्वैव अत्रपूर्णा
ष्टम्यां तत्पूजा परदिने संधिपूजा तत्परदिने नवमीपूजा तत्परदिने विसर्जनमिति प्राञ्चः यदाप्युत्तरात्र्यामिगदंते तदापि बलिदानादिकं स्वल्पकालएव अष्टमनवमी
सासमीविद्धैवपूजायां बलिदानंतु सप्तदशमीविद्धैव द्वितीयादिनवम्यल्पभेपूर्वदिनएवनवमी मध्येकार्यं बलिदानंवा दशमी प्रयुक्तं महानिशायांच नवमीप्रयुक्तेचदिवैव
होमान्तंसयत्र वारात्रीतरस्मिन्दिवा यदातु नवमीविद्धायां पूजा त्रयस्येककालताप्रसक्तिस्तदातत्रैणतत्र यदाष्टमी नवमीपूजयोः प्रातः कुर्वंतिकयोः पृथक्संधि
वृत्तदापृथगेव संधिकालस्पृग्भेसंधिपूजा पिंडिकावा रात्रौवापृथगेवकार्या संधिश्चतिथ्योर्घट्याद्यंडात्मकः यदा षष्टिदंडायाअष्टम्याः परदि
नेशेषस्तदाष्टमीपूजा पूर्वेद्युरेव संधिपूजा नवमीपूजा च सहपरदिने प्राच्योनवंच पत्रिकापूजा विषयेमितिकेचित् अथविहर्नवं तद्दशम्यां तस्याः एवं
डेवंदशम्यां श्रवणं प्रशस्तयोगे पूर्वत्र तत्रतद्योगाभावेपरत्रैव परदिनेदशम्यभावेतु पूर्वदिनएवनक्षत्रयोगाभावेपि दिनद्वयेपि नक्षत्रयोगसत्वा
सत्वयोस्तु प्रातःकालव्याप्तिसत्वेननिर्णयः तदनंतरंच तस्यापारणा येषांनवम्यामेवपारणा विसर्जनयोरन्यत्रः नवम्यां पारणा दशम्यांविसर्जनमिति
वाकुलाचारस्तेतथैवकार्यं कुलाचारानुरोधतः नवमीपारणायांतु तिथिवृद्धौपरेवसाम्येचपूर्वस्यां पूर्वापारणा एवंविनिर्णायइति परशुरामप्रतापे
अष्टम्यांपारणेति के चांचित्कुलाचारस्तेत्रनवमी प्रयुक्तपूजादिकहोमपारणा एवं नवम्यांपारणायामपि दशम्यांपारणासुपक्षेकेषांचित्

धानं अस्यादर्शस्यामेवशक्तीदर्शनं राहुप्रपराजिताप्रजा खंजरीटकाषदर्शनं स्त्रीमोक्षणं चात्र ग्रामसीमातथेशानीदिगतोशानीपूजा एषु कर्मसु दर्शस्याः खंडत्वे यदापरदिने एवापराह्णव्याप्तिस्तदापरत्रैव तत्रोवापिपरास्यामेव श्रवणलाभे सैवेकादशीयुतग्राह्या अपराह्णरूपकालव्याप्तिरप्यत्र वाप्रेक्षिता अपराह्णे श्रात्रत्रयो द्विःसंगेनतथैवा वादर्शनात् उत्तरस्यांश्रवणयोगाभावेतु सर्वपक्षेषुनवमीयुतैव अपराह्णकालव्याप्तिलाभात् प्राच्यास्तु दिनद्वयेप्यपराह्णव्याप्तो नक्षत्रयोगाभावेपिपरदिन एव घटिकान्यूनदर्शस्याः पूजानर्हत्वात् श्रवणयोगेपिपूर्वैव तत्पूर्वे रुसंच देवीविसर्जनार्थं तत्रैवतदंतापकर्मन्यायात् एवं चापराह्णप्रतीक्षयास्वल्पदर्शनयोगेपिपूर्वैव तत्पूर्वेरुसंच देवीविसर्जनार्थं दर्शस्यां तन्मध्येपराजिताप्रजनमिस्त्रीकुंभपारयात्रा द्विविधं तत्रकाम्यं प्राप्तोतु ब्रह्मणद्वारा नवम्यां होमकारयित्वा पारणंकार्यं सप्तम्यां तेब्राह्मणाभोजनदा नंच एवंरजस्यपि दृतिनवरात्रं अथदीपावली तत्र-चतुर्दशीअभ्यंग अभ्यंगस्नाने प्रातःकालव्यापिनी पूर्वाप्रावा ग्राह्येतिस्मृत्याः दाक्षिणात्यास्तु चंद्रोदयव्यापिनीत दंसंवेप्रातःकालव्याप्तिन्यपि इत्याहुः अस्यांप्रातरभ्यंगस्नान ततोयमतर्पणं ततोनरकनिर्वर्तनयेदीपदानं प्रदोषसमयेतेतो ब्राह्मणैः सहनक्तभोजनमिति कृत्यं तत्रयापू र्वैवप्राप्तांचंद्रोदयेवावर्तते साउखंडा सर्वेषुकृत्येषु योग्येव यातूनैवप्रातश्चंद्रोदयेवावर्तते तावत्सैव समा प्रातस्तस्यामेवस्नात्वा यमतर्पणं दीपदानंतु पूर्वदिने प्रदोषव्यापित्वा मिलेकअन्येतु स्नानोत्तरप्रदोषे स्नानदिने प्रदोषतिथ्यनपेक्षेतद्दिनात्मात्रं इत्याहुः यातुदिनद्वयेपि तस्यांपूर्वस्यामेव संपूर्णप्रातरभ्यंगकृत्यस्नानानुग्रहाच्च एवंदिनद्वयेपि वैष्णवे प्राप्तायामेवैकदेशव्याप्तावपिपूर्वैव यादिनद्वयेपि तदस्यांशिनी तस्यांपरत्रैवस्नानादि चंद्रोदयकालिकायामितिकेचित् अपरेतस्यामपिपूर्वदिने एव स्नानंतु सप्तम्यांचतुर्दश्यां परत्रैवस्नानादि चंद्रोदयएववा इत्याहुः इदंतुयुक्तं अथतत्रमा अस्यामभ्यंगस्नाने अमाकर्तव्यदीपदानंच श्राद्धानंतरकर्तव्येनप्रतीयते तत्रयदाश्राद्धदिने एवप्रदोषव्यापि न्यमा तदास्यामेव तथापि यदापूर्वेद्युरेव प्रदोषव्यापिन्यमा द्वितीयदिनेच श्राद्धयोग्या तदापूर्वेद्युरेवतत्प्रयुक्तं लक्ष्मीपूजादीपदानादिकं कार्यं उल्काभिः पितॄणांमार्गदर्शनम प्यत्रैव प्रदोषे अथतत्रातिपदा अस्यामभ्यंगस्नाने द्यूतादिकंचकार्यं सायंकाले बलिपूजा तदुत्तरंदीपादिदानंच रात्रौ बलिपूजा यामेव प्रतिपत्पूर्वविद्धा ग्राह्या यत्रैव पूर्वेद्युर्गोक्रीडापूजनादिकंयुक्तं तत्रप्रतिपदिनेचंद्रदर्शनसंभवे सर्वविद्धायामेव प्रातःतत्कार्यं सार्धत्रियामाधिकस्वल्पनपरदिने चंद्रदर्शनं नासंभवेत्परा अस्यां नारीनीरा जनं मंगलमालिकेति कर्मद्वयमुक्तं तन्मुहूर्तमात्रायामपि उत्तरस्यामेवप्रतिपदि तत्रप्रातर्नारीनीराजनं सायंमंगलमालिकेति केचित् उभयोरपि सायमेव

तन्मे आस्तांयुक्तं एतच्चतुर्दशीयुतायांप्रातःपूजादिकमुक्तं इदंमध्याह्नव्यापिन्यांकार्यं यातुपूर्वत्रैवतादृशी सा सैवपक्षंकरेष्वपरैव युग्मवाक्यात् इतिदीपावली अथहोला तत्रपौर्णमासी पूर्वविद्धैव युग्मवाक्यात् दीपनंचप्रदोषेमुख्यभद्रायांसत्यां तत्कार्यं तत्र सैवप्रदोषपूर्वा परावासाग्राह्या तत्रपूर्वस्यां प्रदोषभद्रायां असत्यांसत्यांवा यदातुतत्रभद्रा तदास्तूदयपूर्वभाविघटीद्वयात्मकपूर्वभद्रा तत्प्रतीक्षयातद्रहितःकश्चिदपिकालो लक्ष्यते तदाभद्रादोषातिक्रमेपि तत्र कार्यं यदातुतावत् दूर्यतेनापिभद्रारहितकालोलाभः तदापूर्वदिने रात्रावेवभद्रापुच्छे कार्यं यदातुतत्रैवविषये परदिने पूर्णिमासाधर्यामत्रयमितात्तताधिकावा प्रतिपत्तत्परतोदृश्यते तदाभद्रायामपि नातदापरदिने प्रतिपद्येवप्रदोषे तद्दीपनं नतुपूर्वदिने विद्धेपुछे तत्रप्रतिपत्प्रवेशात्पूर्वमेव तद्दीपनमितिकश्चित् एवंचयादिनद्वयेपि कात्स्न्येनदर्शनवाप्रदोष व्याप्तासत्तरमुत्तरा पूर्वरात्रौभद्रासत्वात् यदातुदिनद्वयेपिप्रदोषास्पर्शः प्रतिपदश्चवृद्धत्वभावः उक्तसमयेभद्रापुछोऽलाभश्च तदाभद्रायामपिदीपनं कदाचित्तत् कालेग्रहणेपिस्नात्वा दीपनंकार्यं निस्नेमितिकेचित् तत्राप्यधिकारात् इतिहोलोत्सवः अथश्राद्धं अविगीतश्राद्धत्वकालविषयंश्राद्धत्वं तदधिकारिणस्तयोरसः पुत्रः तदभावेपौत्रः ततःपत्नी यदिदाप्यहरेत् अन्यथातुदायहरस्तदभावेदौहित्रः ततः सोदरः ततोभ्रातृष्वसृदयादि अन्यत्रविस्तरः सर्वाभावेस्त्रियः कुर्युरित्यादि आसुरादिवि वाहोढाविषयं अनुपनीतोविपुत्रादि श्राद्धाधिकारी कृतचूडश्चेत्स्वधाशब्दं प्रयुंजीत अकृतचूडोपित्रिवर्षं कृतचूडस्त्रिवर्षश्चेद्दर्शं नापिपठेत् तत्रश्राद्धं द्विविधं पार्वणमेकोद्दिष्टंच तत्रसर्वश्राद्धानांदर्शश्राद्धं प्रकृतिः आपस्तंबानां यदपरपक्षश्राद्धं तेषांसूत्रेतत्रैवधर्मोपदेशात् अमाश्राद्धंच कृष्णपक्षश्राद्धादिन्नमेव तथाप्यमाश्राद्धमात्रकरणेनाय शंकस्य कृष्णपक्षश्राद्धसिद्धिर्भवति अविरुद्धंगत्वे तंत्रेण विरुद्धंगत्वेवासिद्धिरस्तु इतिकश्चित् अन्येतु तस्मा उभयधर्मोक्तांतत्रेनतत्राधिकरणेश्राद्धानुष्ठानेनोभयोरपि सिद्धिरित्याहुः असमंवर्तुलशंकस्तु कुंभार्के दर्शेऽमायामितित्रिःकुर्यात् तत्राप्यशक्तौ कन्यार्कमायां तत्राप्यशक्तेन ब्राह्मणभोजनंकार्यं सामेक्षुपिंडदानेना पिसिद्धिः पूर्णे तदा नाशक्तौ किंचिद्धान्यदानं तत्राप्यशक्तौ करात्रमितंतिलदानं तदभावे समाप्तेतिलपात्रं तिलांजलिदानं गोग्रासमात्रं दानं किंचित् सर्वाभावेवनं गत्वा भुजावूर्ध्वौ कृत्वा नमोस्तिविष्णवे नमः इतिमंत्रेण नभोन्यत्रकथोपधार्यं --- नतोस्मि तत्संतर्पयतोपितॄन्प्रयतो कृतोपवीतो वर्तमानो मनुष्येत्यतित्रिःपठेत् एवंवरः श्राद्धकालः

संबंधः श्रद्धासत्रः पुत्रास्मृतितो विप्रकृष्टः ततोपि आत्मरिक्थाद्धरं पित्रोः पत्न्यादीनां तत्कादशाहकृत्य एकदिने तिथिभेदेन पित्रोः प्रेतो यत्पूर्वं दुर्योरपि क्रमेण अन्येषांतथा प्रेतावा
सतियोगेन नैकः श्राद्धकर्मैककर्तृकः इतिन्यायेन एकस्मिन्क्रियमाणे मत्रापरस्य प्रसंगात् सिद्धिविघ्नं यथा गौर्मिनिश्राद्धे यथावादर्शयुगादिश्राद्धे यत्र पत्नीमृतेचित्रायामरुद्धतत्रतिथिभे
दनमरणे तत्र तन्नतिथौ तस्य तस्याश्वश्रूथगेवादिकं यदातत्रतिथेर्व्यं पाकं तंत्रेण कृत्वा श्राद्धं पृथगेव खलमन्यथापि संधनमरणं आसक्तिक्रमेण मरणक्रमेणक्रमः परत्रेचा
रेहलोकस्थैः पिंडैक्यं द्विपिंडोपि पृथगेव अंगतत्रातु तत्रापि पृथगेव ब्राह्मणः पिंडश्च अंगतामेव तत्रोभयसंधिपक्षांतरमादिकं विषय अन्योन्यरुक्त्यपेक्षया व्यवस्था अत्यवहितासन्न
तिथिमरणेखंडतिथावृद्धिदिनश्राद्धप्राधान्ययमेव निर्णयः यत्तु तिथिभेदेनापि अन्वारब्धे भर्तृतिथावेवपत्न्या अपिश्राद्धानुष्ठानं तन्नयुक्तं तत्रतत्तत्तिथेः पृथगेवतत्सत्तत्सत्त्व
श्राद्धयुक्तं अनेकाभिमतोत्तिरेकचिंतारत्नेप्येवमेव तत्रद्वितीयपक्षे प्रथमपितृश्वशुरतः साक्षान्मातृश्वश्रूतो ज्येष्ठादिक्रमेण पार्वणेकादृष्टया सन्निपत्ते पर्वपार्वणं ततएकदृ
ष्टाभिप्रेके विपरीतमन्ये अनेकमितितन्नानिपत्ते निमित्तानुक्रमेण यद्यप्येकदेवताकश्राद्धद्वयादीन्येकदिने तिथिहानितथापि नैमित्तिकानिवचनबलादुक्त्येव निस्काम्ययोरे
कदेवतयोः सन्निपातेकाम्यनिष्पत्तिः इतिपार्वणकालः सपिंडीकरणात्प्राक् नित्येनैकादृष्टमेव तत्रदशाहेतत्क्रियमाणानिवानि एकादृष्ट्यापि ब्राह्मणायुग्मा एवसेके
अन्येतु अयुग्मा एवेत्याहुः एकादशाहिके एकोपि तत्र शय्यादानहेमाश्वगवादि एकादशश्राद्धं स्वस्वपक्षोक्तं कृत्वा नारदिने तेनक्षत्रियादिभिस्त्रयोदशश्राद्धादि त्र्येहकात्रयोदशे विभिश्र
तमध्यएवदशाहकृत्यानुष्ठानेतदंतएवतत्कार्यं इतिशूलपाणिः मिताक्षरायांक्षत्रियादिभिरशौचमध्येपिद्वचनात् एकादशएवतत्कार्यं त्र्येहकात्रयोदशेचिभिरपि तत्रैवकार्यमिसुतं
गार्ग्यपूरकदशमपिंडसमाप्तिस्त्वेतन्मते क्षत्रियादीनां स्वस्वशौचांसदिनएव इतिनवानि अथनवश्राद्धानि तानिचषोडशश्राद्धानि आद्यमासिकानमासिकद्वितीयमासिकत्रै
पक्षिक ४ तृतीयमासिक ५ चतुर्थमासिक ६ पंचममासिक ७ षाण्मासिक ८ ऊनषाण्मासिक ९ सप्तमं १० अष्टमं ११ नवमं १२ दशमं १३ एकादशं १४ द्वादशमासिक १५
ऊनाब्दिकानि १६ तत्रमासिकानिप्रथमादिमासांश्रुतितिथौ ऊनानितत्तन्मासंसतिथिभिन्नवर्ज्यतिथिषु एकभोजने प्रायश्चित्तानि नवश्राद्धचांद्रायणं मासिकेपराकः त्रैपक्षि
कैतिकृच्छः षाण्मासिकेकृच्छ्रं ऊनाब्दिकेचार्धकृच्छ्रं आब्दिकेएकाहकृति ऊनाब्दमासिक द्वादशेहपि तत्रैकादशेहयं नवश्राद्धं साब्दमासिके महैकोद्दिष्ट इति महैकोद्दिष्टविधा
भावेपि तत्रत्रैपक्षिकपर्यंतानि आहिताग्नेर्दाहदिनाद्यावत्प्रथमद्वादशाहादिषु एकाहेनैर्नरन्यूनैर्मरणादिनादारभ्य तदूर्ध्वानितु ऊनाब्दमरणादिनादेव एतानि षाडाब्दश्राद्धानि स्वस्व
कालेकर्तव्यानि इतिमुख्यः कल्पः यदा एकस्मिन्नेवाब्दिकेएकादशेद्वादशेवा द्वादशदिनापेक्षया आद्यमासिकेन्यूनानिपंचदशेव एवंहद्विपूर्वादिनादा यदा सपिंडीकरणार्थंक्रि
यते तदा माघेतिस्वकालकृता वार्षिकाद्यावतांसेव तथैकादशाहप्रभृति आब्दं एकविप्रभोजनपर्याप्ता असंकीर्णा दर्भकुशोदक्यः अत्रापिदानं कृता कृत तत्रवर्षांतसपिंडी

करणपक्षेप्रेतशब्देनोल्लेखः द्वादशाहादौ सपिंडीकरणेजातावुल्लेखानकार्यः प्रसंहतत्करणाशक्तौ एकस्मिन्नेवादिनेऽपकृष्यापि कार्याणि अत्रोदकुंभालये एथगेवस्थाप्यः
एषउदकुंभः इदमनलमिति, नतु सोदकुंभमग्नं सामोदकुंभमितिवा आचारात् अत्रार्घ्यकाहनादिश्राद्धीयसकृत्धर्मनिष्टानिः कर्तृभेक्यनियमेपिसच यदंपार्वणं
तदप्यदेवं एकोद्दिष्टेतिकर्त्तव्यतेति एकाष्टकैः एकदल एकपि दौ नावाहनाग्नौ करणविधेर्देवः स्वधितमितिहि निशश्रं सकलादितामिस दुरुक्तं उत्तिष्ठतो नियश्यस्थाने आभिर
ष्यत इतिसंदिसर्गे अभिरम्यतस्थं हे रसुनरइति अथसपिंडीकरणकालः तत्रसाग्निकेन पिंडपितृयज्ञाधिकारिणाकर्त्रा औशो चोनदिने मध्यस्थंवा द्वादशश्राद्धानिविधा
य तदनंतरदिने दर्शादिवाकृत्वा यत्रक्वापिदिने नवा सपिंडीकरणं कृत्वा दर्शे पिंडपितृयज्ञः कार्यः द्वादशदिनएवदर्शपाते तत्रैवतत्रैव षोडशश्राद्धानि सपिंडनं पितृयज्ञश्च आशौचांत्यदिनेवा
एवदर्शपाते तु तत्रैवषोडशश्राद्धसहितं सपिंडीकरणं कृत्वा पिंडपितृयज्ञः कार्यः सपिंडीकरणं प्रकृत्य पिंडपितृयज्ञं कृत्वा प्रशस्यत्वात् नत्वेपितृकस्यतत्करणे प्रसक्तेरभावात् मातुरपि पितृसप्त
मिः श्राद्धार्थं त्रिपपिंडपितृयज्ञार्थमप्यपेक्षितेव तत्र पिंडेष्वपि तस्याअंशभागित्वात् नचैवं पिंडपितृयज्ञेपि स्वदत्तौकलेनोल्लेखामतितं विनाप्यंशभागित्वेनोपपत्तेः मातुर्माता मह
नसपिंडनेततपिंडवृद्ध अन्यथा मातामहांशभागित्वार्थं तत्रापिस इतिहेतुकेसुल्लेखावचनं एवंचश्राद्धेपितादृशेउल्लेखाव्यर्थमेव एवंदर्शश्राद्धार्थमपि सात्रिकस्यापक्वान्नेआकांक्षि
तस्यापिसपिंडनंविनातंप्रतिनिधिहवनं एवंदर्शश्राद्धेधिकारिसद्भावेपिदर्शश्राद्धार्थं द्वादशाहएवकार्यं नत्वाहिताग्नेवत्रयोदशे यद्याहिताग्नेः प्रतिबंधकवशादेपुनर्ज्ञाते तदा
व्रतविघ्नं कालप्राप्तानलिखंतीति उभयमार्तैरभ्युपेतं संवत्सरपर्यंतंनतरमत्तत्तिथौ मुख्यः कालः स्मार्तार्थसारे तत्रचैभाविप्रथमसवत्सरादिनेतदुक्तं तदयुक्तं तत्रप्रथमाब्दिक
स्यैकोद्दिष्टादेतिथ्यादित्यादयः परंतु सपिंडीकरणव्रतत्वनिबंधनिमित्तपूर्वं पितृत्वप्राप्तिरूपफलभागिव्रतं देवसंबंधेकोद्दिष्टस्यमुख्यत्वात् तस्यमध्याह्नः कालः पार्वणंतुतदुभयव्रतसंयोजनस्यकर्तुमश
क्यत्वात् तदुपकारिआब्दिकस्यतुपार्वणवादपराह्णकालइतिनतत्कालावरोधः द्वितीयश्राद्धकरणांतरं तत्रैवेणाघ्यागभोजनेनक्षतिः देवतामात्राब्दिकमेकोद्दिष्टंतेपि गौणकालस्यादिरो
धानेतत्कर्तृशक्यं यद्यपि प्रेतेकोद्दिष्टंश्राद्धभोजनं निषिद्धं तथापि पार्वणेशतेऽनुज्ञानमावश्यकं अतएवतत्र पार्वणेकोद्दिष्टेश्रेयः पाकप्रयादाचारः शिष्टानां एवंसपिंडीकरणंकृत्वात
दिन एवाब्दिकं नुधानभियाद्धः संवत्सरांतेतत्करणाशक्तौ निर्णयमेतु एकादशनवमपक्षे तृतीयमासे तृतीयषष्ठेषु यस्यकस्यचित्तिथेः क्रमेणपूर्वपूर्वाभावे तत्रत्यपक्षेएकादशदिनमार
भ्यद्वादशेह षोडशश्राद्धानि कृत्वा त्रयोदशे ऊनाब्दं द्वितीयंच त्रैपक्षिकं तृतीयंच चतुर्थ पंचमं षष्ठं ऊनषाण्मासिकं सप्तमंच अष्टमं नवमं
दशम एकादशं द्वादशं ऊनाब्दिकंच तत्राप्यशक्तौ एकादशेवा तानिकृत्वा मृतितिथाहद्वादशाहे अयमेवपक्षः शस्तः अन्यथा कुलधर्माणां चुसाचेवयुष्यः क्षयात् अक्रियतश्चायं
स्यद्वादशाहः प्रशस्यते इसुनेः अस्यादर्शनात्तसपिंडीकरणाधिकारिणावत्सपिंडीकरणं कुलाचारात्एकादशमपि प्रोह्यकर्मेनकार्यमिति द्वादशाहादिकालेप्रमादादहानं तत्तदुत्त

ज्ञानसंवरणीयं कर्म । तत्र ज्ञानं पञ्चविधं मतिज्ञानादिभेदात् । तत्र मतिज्ञानावरणीयं कर्म चतुर्विधं अवग्रहेहापायधारणाभेदात् । तत्र अवग्रहो द्विविधः व्यञ्जनावग्रहोऽर्थावग्रहश्च । तत्र व्यञ्जनावग्रहश्चतुर्विधः श्रोत्रेन्द्रियव्यञ्जनावग्रहो घ्राणेन्द्रियव्यञ्जनावग्रहो रसनेन्द्रियव्यञ्जनावग्रहः स्पर्शनेन्द्रियव्यञ्जनावग्रहश्च । अर्थावग्रहः षोढा पञ्चेन्द्रियमनोनिमित्तभेदात् । तत्र चक्षुर्मनोवर्जितानीन्द्रियाणि प्राप्यकारीणि । तत्र चक्षुषा रूपं गृह्यते मनसा च गुणगुणिसम्बन्धः । श्रोत्रेन्द्रियं शब्दं गृह्णाति घ्राणं गन्धं रसनं रसं स्पर्शनं स्पर्शं च । व्यञ्जनावग्रहो नयनमनोवर्जितैश्चतुर्भिरिन्द्रियैर्भवति । अर्थावग्रहः षड्भिरपि । ईहापि षोढा । अवायोऽपि षोढा । धारणापि षोढा । सा च षोढा मतिज्ञानावरणीयं कर्म । श्रुतज्ञानावरणीयं कर्म चतुर्दशविधं अक्षरानक्षरसंज्ञिसम्यगसम्यगनादिसपर्यवसितसादिसपर्यवसितगमिकागमिकाङ्गबाह्यभेदात् । तत्र अक्षरश्रुतं त्रिविधं संज्ञाव्यञ्जनलब्ध्यक्षरभेदात् । तत्र संज्ञाक्षरं लिपयः । व्यञ्जनाक्षरं घोषाः । लब्ध्यक्षरं ज्ञानं । अनक्षरश्रुतं निःसरणं । संज्ञिश्रुतं संज्ञिनां । असंज्ञिश्रुतं असंज्ञिनां । सम्यक्श्रुतं सम्यग्दृष्टीनां । मिथ्याश्रुतं मिथ्यादृष्टीनां । सादिश्रुतं सपर्यवसितं । अनादिश्रुतं अपर्यवसितं । गमिकं दृष्टिवादः । अगमिकं कालिकं । अङ्गप्रविष्टं द्वादशाङ्गं । अङ्गबाह्यं अनेकविधं । अवधिज्ञानावरणीयं कर्म द्विविधं भवप्रत्ययं गुणप्रत्ययं च । मनःपर्ययज्ञानावरणीयं कर्म द्विविधं ऋजुमतिविपुलमतिभेदात् । केवलज्ञानावरणीयं कर्म एकविधं । दर्शनावरणीयं कर्म नवविधं चक्षुरचक्षुरवधिकेवलनिद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानर्द्धिभेदात् । तत्र चक्षुर्दर्शनावरणं चक्षुषा दर्शनं न भवति । अचक्षुर्दर्शनावरणं चक्षुर्वर्जितेन्द्रियमनोनिमित्तं दर्शनं न भवति । अवधिदर्शनावरणं अवधिदर्शनं न भवति । केवलदर्शनावरणं केवलदर्शनं न भवति । निद्रा सुखप्रबोधा । निद्रानिद्रा दुःखप्रबोधा । प्रचला स्थितस्यैव । प्रचलाप्रचला चङ्क्रमतः । स्त्यानर्द्धिः दिवा चिन्तितमर्थं रात्रौ साधयति । वेदनीयं कर्म द्विविधं सातवेदनीयं असातवेदनीयं च । तत्र सातवेदनीयं द्विविधं भूतानुकम्पा व्रत्यनुकम्पा सरागसंयमादियोगः क्षान्तिः शौचमिति । असातवेदनीयं नवविधं परदुःखं तद्धेतुः स्वदुःखं तद्धेतुः उभयदुःखं तद्धेतुः तीव्रासातोदयः दीर्घासातोदयः अनन्तासातोदयः असातानुबन्धोदयः असातवेदनीयं कर्म । मोहनीयं कर्म द्विविधं दर्शनमोहनीयं चारित्रमोहनीयं च । तत्र दर्शनमोहनीयं त्रिविधं सम्यक्त्वं मिथ्यात्वं सम्यग्मिथ्यात्वं च । तत्र सम्यक्त्वं प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं । मिथ्यात्वं तत्त्वार्थाश्रद्धानं । सम्यग्मिथ्यात्वं तदुभयं । चारित्रमोहनीयं द्विविधं कषायवेदनीयं नोकषायवेदनीयं च । तत्र कषायवेदनीयं षोडशविधं अनन्तानुबन्धिक्रोधमानमायालोभाप्रत्याख्यानावरणक्रोधमानमायालोभप्रत्याख्यानावरणक्रोधमानमायालोभसंज्वलनक्रोधमानमायालोभभेदात् । तत्र अनन्तानुबन्धिनः सम्यक्त्वचारित्रघातिनः । अप्रत्याख्यानावरणाः देशविरतिघातिनः । प्रत्याख्यानावरणाः सर्वविरतिघातिनः । संज्वलनाः यथाख्यातचारित्रघातिनः । नोकषायवेदनीयं नवविधं हास्यरतिअरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदभेदात् । तत्र हास्यं हसनं । रतिः देशादिषु चित्तप्रीतिः । अरतिः तत्प्रतिपक्षः । शोकः अनिष्टसंयोगेष्टवियोगादिजन्यः । भयं सप्तविधं इहलोकपरलोकादानाकस्मिकाजीवमरणाश्लोकभेदात् । जुगुप्सा बीभत्सा । स्त्रीवेदः पुंसि अभिलाषः । पुंवेदः स्त्रियां । नपुंसकवेदः उभयत्र । आयुः कर्म चतुर्विधं नारकतैर्यग्योनमानुषदैवभेदात् । तत्र नारकायुः तीव्रशीतोष्णवेदनाकुलं । तैर्यग्योनं मायाबहुलं । मानुषं प्रकृतिभद्रकं । दैवं सरागसंयमादियोगः । नाम द्विचत्वारिंशत्प्रकारं गतिजातिशरीरबन्धनसंघातसंस्थानसंहननस्पर्शरसगन्धवर्णानुपूर्व्यागुरुलघूपघातपरघातोच्छ्वासातपोद्योतविहायोगतिप्रत्येकसाधारणत्रसस्थावरसुभगदुर्भगसुस्वरदुःस्वरशुभाशुभसूक्ष्मबादरपर्याप्तापर्याप्तस्थिरास्थिरादेयानादेययशःकीर्त्ययशःकीर्तिनिर्माणतीर्थकरत्वभेदात् । तत्र गतिनाम चतुर्विधं नारकतैर्यग्योनमानुषदैवभेदात् । जातिनाम पञ्चविधं एकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियभेदात् । शरीरनाम पञ्चविधं औदारिकवैक्रियाहारकतैजसकार्मणभेदात् । बन्धननाम पञ्चविधं औदारिकबन्धनं वैक्रियबन्धनं आहारकबन्धनं तैजसबन्धनं कार्मणबन्धनं च । संघातनाम पञ्चविधं औदारिकसंघातनं वैक्रियसंघातनं आहारकसंघातनं तैजससंघातनं कार्मणसंघातनं च । संस्थाननाम षड्विधं समचतुरस्रन्यग्रोधसादिकुब्जवामनहुण्डभेदात् । संहननं षड्विधं वज्रर्षभनाराचं वज्रनाराचं नाराचं अर्धनाराचं कीलिकं असंप्राप्तासृपाटिकं च । स्पर्शनाम अष्टविधं कर्कशमृदुगुरुलघुस्निग्धरूक्षशीतोष्णभेदात् । रसनाम पञ्चविधं तिक्तकटुकषायाम्लमधुरभेदात् । गन्धनाम द्विविधं सुरभिदुरभिभेदात् । वर्णनाम पञ्चविधं कृष्णनीलरक्तपीतशुक्लभेदात् । आनुपूर्व्यनाम चतुर्विधं नरकतिर्यङ्मनुष्यदेवानुपूर्व्यभेदात् । तत्र नरकानुपूर्व्यं नरकगतिं प्रति गच्छतो जीवस्य । तिर्यगानुपूर्व्यं तिर्यग्गतिं प्रति । मनुष्यानुपूर्व्यं मनुष्यगतिं प्रति । देवानुपूर्व्यं देवगतिं प्रति । अगुरुलघुनाम न गुरु न लघु । उपघातनाम स्वावयवघातकारणं । परघातनाम परावयवघातकारणं । उच्छ्वासनाम उच्छ्वासनिःश्वासलब्धिनिमित्तं । आतपनाम आतपकारणं । उद्योतनाम उद्योतकारणं । विहायोगतिनाम प्रशस्ताप्रशस्तगतिनिमित्तं । प्रत्येकशरीरनाम प्रतिशरीरं भिन्नं । साधारणशरीरनाम बहूनां साधारणं । त्रसनाम द्वीन्द्रियादिषु जन्म । स्थावरनाम पृथिव्यप्तेजोवायुवनस्पतिषु जन्म । सुभगनाम सौभाग्यनिमित्तं । दुर्भगनाम दौर्भाग्यनिमित्तं । सुस्वरनाम मधुरस्वरनिमित्तं । दुःस्वरनाम अमधुरस्वरनिमित्तं । शुभनाम शोभनावयवनिमित्तं । अशुभनाम अशोभनावयवनिमित्तं । सूक्ष्मनाम सूक्ष्मशरीरनिमित्तं । बादरनाम बादरशरीरनिमित्तं । पर्याप्तनाम स्वपर्याप्तिनिमित्तं । अपर्याप्तनाम स्वापर्याप्तिनिमित्तं । स्थिरनाम स्थिरभावनिमित्तं । अस्थिरनाम अस्थिरभावनिमित्तं । आदेयनाम आदेयभावनिमित्तं । अनादेयनाम अनादेयभावनिमित्तं । यशःकीर्त्तिनाम यशःकीर्तिनिमित्तं । अयशःकीर्तिनाम अयशःकीर्तिनिमित्तं । तीर्थकरत्वनाम त्रैलोक्यपूजाहेतुः । गोत्रं द्विविधं उच्चैर्गोत्रं नीचैर्गोत्रं च । तत्र उच्चैर्गोत्रं लोकपूजितेषु इक्ष्वाकुहरिवंशादिषु जन्म । नीचैर्गोत्रं चाण्डालादिषु । अन्तरायः पञ्चविधः दानलाभभोगोपभोगवीर्यान्तरायभेदात् । तत्र दानान्तरायः दानं प्रति उद्यतस्यापि विघ्नकरणं । लाभान्तरायः लाभं प्रति उद्यतस्यापि विघ्नकरणं । भोगान्तरायः भोगं प्रति उद्यतस्यापि विघ्नकरणं । उपभोगान्तरायः उपभोगं प्रति उद्यतस्यापि विघ्नकरणं । वीर्यान्तरायः वीर्यं प्रति उद्यतस्यापि विघ्नकरणं । एवं ज्ञानावरणीयादीनां मूलप्रकृतीनां उत्तरप्रकृतयः । ज्ञानावरणीयस्य पञ्च प्रकृतयः । दर्शनावरणीयस्य नव प्रकृतयः । वेदनीयस्य द्वे प्रकृती । मोहनीयस्य अष्टाविंशतिः प्रकृतयः । आयुषश्चतस्रः प्रकृतयः । नामनः द्विचत्वारिंशत् प्रकृतयः । गोत्रस्य द्वे प्रकृती । अन्तरायस्य पञ्च प्रकृतयः । एवं

हेमाद्रिस्तु शुक्लपक्षगासु मन्वंतरादिष्वपि अयमेवनिर्णय इत्याह संगवकालिकयो रामदैव श्राद्धयो रप्येवमेव तथा च स्मृत्यर्थसारे निर्णयः दिनद्वयेऽप्युत्तरा अर्धात्मा निर्णीयते तत्र येषां साग्निकानां अन्वाधानपिंडपितृयज्ञ दर्शश्राद्धा नामेकदिनकर्तव्यानि तेषां त्रिधाविभक्तभोगेन तृतीयभागरूपोऽपराह्णः व्याप्तिन्यायेन दर्शदिने निष्पन्नश्राद्धनक्षत्रकः प्रसंगेन सिद्धः पित्र्यवलिस्तु भवत्येव तस्मिन्पितृप्रीतिः कुत्रचिन्नेन साधारण्यात् पितृदेवत्यतया प्रसंगादसिद्धः तत्राग्निताग्नेः श्राद्धस्य पूर्वमेवदर्शवत् पार्वणनिरूपणश्राद्धं तदेव तंत्रांतरे दिनंप्रमुख्यमेवनिर्दिष्टः तस्मिन्पर्यायाया दर्शः कुतश्चिद्धेतुवशादूर्ध्वं वृद्धिक्षयाभ्यां पराह्णव्याप्तो दिनद्वयेऽपि तथासिद्धत्वेऽपि तदव्याप्तिमक्षयोरसंभवएव त्रिमुहूर्तोधिकदृद्धिक्षयाभावात् तस्मात्पक्षत्रयेऽपि दर्शएव अन्यतरदिनएव कुतश्चिन्नदेशनियमेन दिनद्वयेऽपि साम्येन वैषम्येण वा तदेकदेशव्याप्तिरिति तत्रैकस्मिन्नेवादिने कुतश्चित्कालव्यापिरिति तदस्पर्शनैकदेशव्याप्त्या वा भवति तत्र तदस्पर्शश्चानुदयेक्षया ऽमायाः साम्येनाधिक्येन क्षयेण वा एकदेशव्याप्तिरधिक्येनैव तत्रयापूर्वेद्युरेव कुत्सकालव्यापिनी परत्र तदेकदेशमपिन स्पृशति सा तावत्पूर्वैव याचितादर्शे परत्रतदेकदेशस्पर्शी नी सापिपूर्वैव येषांपरदिने चंद्रदर्शनादेकदेशव्याप्तिदिनएवव्याप्ता तेषां अन्येषांपरैव पक्षैकदेशमपि पूर्वेद्युरेवप्राप्नोति सातुपूर्वैव दिनद्वयेऽपि क्षयेण वृद्ध्यसमव्या प्तावपिपूर्वैव यातुत्तरैव कुत्सकालव्यापिनी पूर्वेद्युक्तदस्पर्शनैकदेशस्पर्शनेवासा उत्तरैव यापिपरत्रैकदेशव्यापिनी सापितु उत्तरैव यातुदिनद्वयेऽपि वैषम्येण कुदेश व्यापिनी सायेवाधिकासेवग्राह्या मागस्यतृतीयदिनगतत्वेन तदनुरोधेनात्याप्युत्तरैव यापिदिनद्वये साम्येनैकदेशव्यापिनी सा यदिक्षयेण तदा पूर्वैव यदि वृध्या तदोत्तरा यागप्रभुनोऽपवादोऽत्रापि यदिसाम्येनतदा परा यागप्रभुकोऽपवादोऽत्रापि अत्रयदा चतुर्दशीमिश्रामापं श्राद्धं तदा यद्यमप्रतीक्षया तिसंध्यासमीपा पूर्वैव कुतपः श्राद्धं वह्निशेषं चेत्तदा सत्रतीक्षया नो चेच्चतुर्दशक्षणैरेव चतुर्थभागेनकुत्सकालशेषं तावत्क्षपीत्वा अमासत्तनोशेषं कुत्सक्षयः अष्टमभागयोस्तु अमांते कुत्सक्षयाद्धीति ज्योतिःशास्त्रप्रसिद्धं अथनिरग्निकानां नक्षत्रतिथिसानिर्णीयतेति तेषां पंचधाविभक्तपराह्णव्याप्त्यानिर्णयः तत्रयापूर्वैव तादृशीसा सेवग्राह्या दिनद्वयेकुत्सा पराह्णव्याप्तौ उत्तरतिथेर्वृद्धिसाम्ययोरुत्तरैव तस्याःक्षयेपूर्वा दिनद्वयेऽपि वैषम्येणैकदेशव्याप्तौ आधेकुतश्चित्तृतीयग्राह्या दिनद्वयेऽपि साम्येच तस्यांतु अमावृद्धिसाम्ययोः पूर्वा अमाक्षयेपूर्वा एतत्सर्वंतं अन्वाधानपिंडपितृयज्ञश्राद्धकर्तव्यता नियमरहितसाग्निकानामपि कुत्स्यं पिंडपितृयज्ञश्राद्धयोर्भिन्नदिनप्राप्तेदिनद्वयेऽपराह्णस्पर्शेतु सा ग्निकैः पूर्वा कार्या निरग्निकैः परा साग्नयोः श्रौतोपासनाग्निमंतरापि हेमाद्रिस्तु निरग्निकानां कुतपोऽमाश्राद्धं काकइति तच्छास्त्रीयवेतृणां निर्णयः यत्रमु ख्यकुतपेऽसंभवे कुत्सादि त्रिमुहूर्तरूपगौणकुतपव्याप्त्या निर्णयः अपराह्णस्तु सामान्यविषय इत्याह कालादर्शे व्यवस्थैव तदप्यकृत्स्नमित्यन्ये प्राचांस्तु दिनद्वयेऽपराह्ण

व्याप्तौ तिथिस्पर्शविषये सायंप्रातर्निरंशेत्तरा दिनद्वयेऽपराह्णव्याप्तौ गंधर्वकुतपौहिणरूपत्रिमुहूर्तव्याप्तिनीयासा सैवग्राह्येति वदंति गौडास्तत्र सारकृत् सावित्रजयंत गंधर्वकुतपौहिणौ विसृज्य विजयनैऋतमाहेंद्रवरुणपराह्णइतिपंचदशमुहूर्तेति अमानिर्णयः अथसंक्रांतिः अत्रस्नानं किंचिद्दानादिनित्यं तत्रसर्वसंक्रांतिषु अर्धेचमिलिता त्रिंशन्नाड्यः पुण्यकालइति सामान्यनिर्णयइतिदिक्कालः उभयतः षोडशषोडशेतिशातातपः तत्रस्थिरासु विष्कुपच्छायासु श्राद्धकालः शतः हृत्व भावरूपपरशीतिषु उत्तरः प्रशस्तः एवंकर्कपिपूर्वं मकरस्थोत्तरतः तुलमेषयोरुभयतादशदशशक्ताः यायासनिहता स्तास्ता अतिपुण्याः वस्तिष्वस्तु कर्के त्रिंशत्पूर्वाः मकरे पराविंशतिः शस्ता इत्याह एवंचत्रिधासंक्रांतिः पूर्वभोगिन्युत्तरभोगिन्युभयभोगिन्यइति तायदि दिवामध्यपराह्णेषु नामंते तदादिवैवतत्काललाभात्साम्यमेव यदातुपूर्वभोगिन्यो उदयोत्तरमव्यवधानेन ज्ञायमानायां दिवापूर्वः कालोनलभ्यते उत्तरभोगिन्यास्तु सूर्यमव्यवधानेन ज्ञायमानायांतु तास्तथा नलभ्यते तदापूर्वे भागावृद्धि नेंपरभागावृद्धिर्नेदिनमेवहुत्स्नपुण्यं मनुप्रशस्तकालोऽशस्तोऽपिरात्रिः अर्धरात्रादधोरात्रौ संक्रमणे आवर्तनोनतः पूर्वदिनभागः तस्मिन्रात्रौसंक्रमणेपुरो दयोत्तरतः परादिनभागमध्याह्नपर्यंतः पूर्णार्धरात्रे घटिकाद्यात्मके संक्रमणेतु यदिपूर्वदिनोत्तरार्धकिंनिं तिथ्यादयोभिन्ना संक्रमकालिकातिथिदिनद्वयार्धयोरपि तदा पूर्वभो गिनीषु पूर्वदिनोत्तरार्धं उत्तरभोगिनीषु उत्तरदिनपूर्वार्धं उभयतोभोगिनीषिछा भकरकर्कटयोस्तु रात्रिज्ञानतयाविशेषः तत्रमकरेत्वर्धेयदाकदाचिज्ज्ञाते उत्तरदिन पूर्वदिपुण्यं कर्केचोदयात्पूर्वयदाकदाचिज्ज्ञाते पूर्वदिनएवोत्तरार्धपुण्यं आचारस्त्वेवानुष्ठानं अत्रसंक्षेपाचार्योदयोत्तरोदयकालः पूर्वसंध्याकर्के उत्तरदिनार्धपु ण्यमितिनारदः अस्मादर्धसंध्यायांमकरेचसंक्रांतिप्रयुक्तयात्रामैथुनादिनिषेधेष्वपितएवकालः इतिसंक्रांतिकालनिर्णयः अथग्रहणकालः अत्रदानस्नान होमश्राद्धानिनित्यानिकाम्यानिच तस्यग्रस्यमानेस्नानं ग्रस्तेहोमः श्राद्धंच मुच्यमानेदानं मुक्तेपिस्नानं नित्यं अत्राशौचेनोप्यधिकारः मनुस्नानमेवाशौचेनोनदा नश्राद्धं इतितन्निर्मूलं तच्छ्राद्धमात्रेहस्त्रावा सतिसंभवेपक्वेनापीसन्ये इदंचस्नानश्राद्धं दिरात्रेवपि अत्रदानंचासंस्कृतमपात्रेभ्यायाधिरेयं संस्कारादिरहि तज्ञातिमात्रब्राह्मणाभावेपिदेयं अयमेवब्राह्मण इत्युच्यते अत्रस्नानहोमयमपिसचेलमेव ग्रहणशौचातीतं पूर्वपक्वंचसाज्यं आरनालं किलाटतक्रसक्तुमेरुपक्वतैला नितुनवर्ज्यानि उदकेचकुशछन्नेनदृष्टेभैत्रयदेशेयावच्छ्राद्धक्षमयोरयंतावद्देशेतावान्पुण्यकालः तादृशस्यचशास्त्रतोज्ञानमप्यनुज्ञानप्रयोजकं अतएवह्रीपो तरस्थग्रहणे नस्नानदानादियोग्यता निवेशनेचांधातमेघाछन्नेचजन्माद्यमावास्यादर्शस्यदर्शननिषेधपालनपितॄणांचस्नानायनुद्यानं अतिसूक्ष्मकालत्वाद् नादेश्यानांकस्यापिदर्शनार्थंगमनंच निमित्तनिरासः श्राद्धस्तुस्नानादिकर्तुं सदर्शनमेवनिमित्तं एवंचांधातमेघाछन्नेचनस्नानादि द्वीयंतरीयग्रहणे स्नानादिनिषेधस्तुसिद्धानुवादः मुक्तिस्नानंतुशास्त्रीयमेव अतएवमुक्तिकालेमेघाछन्नेचिस्नानंतदुत्तरभोजनादिचभवत्येव ग्रस्तास्तेतु वचनात्मरेघुरूपत्वे

नागोजी

स्नानादि अत्राप्युदयस्य शास्त्रीयमेव ज्ञानं प्रयोजकं दर्शनयोग्यताया निमित्तत्वेपि प्रयत्नानपनेयप्रतिबंधकविरह एव तेनांधानां मेघाच्छन्नेच स्नानादिनभ
वत्येवेत्याहुः उपरागे निष्ठशास्त्रनिर्णीतकालावयवं किंचिन्निष्ठपरप्रयत्नापनेयप्रतिबंधकविरहोऽत्रोपरागनिष्ठदर्शनयोग्यता सचस्नाननिमित्तनिश्चीयमानः एवंचां
धस्य स्नानं भवत्येव यस्य चाष्टमस्थाने ग्रहणं तेन दृष्ट्वापि स्नानं न बाधकं मेघच्छन्ने न स्नानमिति तु नव्याः भोजनं तत्काले पूर्वकाले ग्रस्तास्ते उत्तरकाले च निषिद्धं तत्र सूर्यग्रहे ग्रहणयाम
रूपावधेः पूर्वयामचतुष्टयं न भोक्तव्यं चंद्रग्रहे तु तदवधेर्यामत्रयं विधौ ग्रस्तोदये ततः पूर्वमह्नि भोजनाभावः एवं चंद्रग्रस्तास्ते तां रात्रिमुत्तरं वाऽहरभोजनं सूर्यग्रस्तास्ते तु तदहोरात्रमभो
जनं यच्चंद्रग्रहे मोक्षोत्तरं भोजनं तत्सार्धयामपर्यंतमेव रात्रौ द्विघटिका महानिशातः पूर्वमिसन्ये बालवृद्धातुरैस्तु ग्रहणाद्यमुहूर्तावधेः प्राक् मुहूर्तत्रयं न सर्वथा भोक्तव्यं एवं ग्रस्तचंद्रास्तेपि यावत्त
दुदयमभोजनेनावस्थातुमसमर्थानां शास्त्रावगतमुक्तिकालभूता हर्भागोत्तरं भागद्वयमेकभागं वा सत्का भोजनं एवं ग्रस्तसूर्यास्तेपि एवं ग्रस्तास्ते पुत्रवत् गृहिणाप्यहोरात्रनिषेधः पा
ल्यः यस्तु ग्रहणे पुत्रवत उपवासनिषेधः स तन्निमित्तकस्य काम्यस्यापि ग्रहणदिन एव न तत्पूर्वदिने प्राच्यास्तु ग्रहणदिने श्राद्धाधिकारिणा ततः प्राक् न भोक्तव्यमित्याहुः अत्र चंद्रस्य ग्र
हणकाले भोजने प्राजापत्यं प्रायश्चित्तं तद्दिने भोजने त्रिरात्रं तदूर्ध्वं ग्रस्तोत्तरनिषिद्धकालभोजने चैतत् स्त्रीबालवृद्धानामर्धं इंदोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः गंगातोये तु संप्राप्ते
इंदोः कोटीरवेर्दश अन्यकालीने तत्तीर्थस्नाने यत्पुण्यं ततो लक्षगुणं ग्रहणकालिकं तत्तत्तीर्थस्नाने इत्यर्थः आतुर उच्छोदकेनापि स्नायात् रविवारे रवेर्ग्रहणं सोमवारे सोमग्रहणं
चातिप्रशस्तं सत्तीर्थेर्कविधुग्राहे तंतुदामनपर्वणोः मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् अत्र मंत्रमात्रकथनमेवोपदेशः इति ग्रहणं अथानध्यायाः तत्र नित्यास्तावत् च
तुर्दश्यौ अष्टम्यौ पंचदश्यौ प्रतिपद्द्वयं मन्वाद्या युगाद्याश्च ज्येष्ठशुक्लद्वितीया आश्विनशुक्लदशमी माघशुक्लचतुर्थी द्वादश्यौ कार्त्तिकी फाल्गुनी आषाढी उत्तरद्वितीया अयने
विषुवे आषाढकार्त्तिकशुक्लद्वादश्यौ भाद्रशुक्लद्वादशी च महालयांतर्गते मघाभरण्यौ पूर्वापरमुहूर्तद्वयरूपा महानिशा च अस्तादूर्ध्वमर्धरात्रात्त्रयोदशी सप्तमी चेत्तदा प्रदोषः चतुर्थ्यां नक्ता
दिकापर्यंतायां तत्रार्धरात्रावनध्यायः उत्तरदिने नध्याये भाविनी पूर्वनिशा चानध्यायः खंडत्वे तन्निर्णयश्च उदयेस्तमये वापि मुहूर्तत्रयगामि यत् तत्तिथिस्तदहोरात्रमनध्यायविधौ विदुः
केचित्तु यावन्नाडीपर्यंतमनध्यायतिथिस्तावदेवनाध्येयमित्याहुः असंतवृद्धिक्षययोः क्षये दिनांतैकमुहूर्ता अप्यनध्यायप्रयोजिका वृद्धौ तु त्रिमुहूर्ताधिका तत्प्रयोजिका अल्पवृद्धिक्षययो
स्तु द्विमुहूर्तादुपरि अनध्यायतिथिदर्शनेऽनध्यायः प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी उदयविद्यमाना चानध्यायप्रयोजिकेति केचित् अथ नैमित्तिकाः तत्र तात्कालिकाः श्वक्रो
ष्टुगर्दभवृककोलूकशृगालदंतिशब्ददुःखिताक्रोशेरोदने च नाधीयीत सामशब्दे च श्रूयमाणे वाणमोक्षशिक्षादशाद्युत्पन्ने च शब्दे देहच्युतमांसास्थिशवविष्ठारेतोमूत्रार्तवबसास्वे
दाश्रुदूषिकाश्लेष्ममद्यशवशूद्रोत्पन्नश्मशानपतिता यावद्दृष्टिमापद्यंते तावदनध्यायः शूद्रपतितयोः समानागारेपि चंडालशवसूतिकानां श्रावणे त्रिरात्रं वाग्यमः प्रायश्चित्तं शवां
त्यजानां आमध्यावस्थानां अनध्यायः नगरादौ तु न दोषः श्मशानग्रामांतमहापथेषु नाध्येयं आशौचिनो यावदाशौचमनध्यायः ब्रह्मचारिणामाशौचाभावेपि सपिंडमरणे त्र्यहं म
हागुरु आचार्यनिपाते द्वादशाहं आशुचिदूषितदेशे च विद्युत्स्तनितवर्षाणां काले संध्याकालातिरिक्तकालेऽसकृदुपजने प्रत्येकं तात्कालिकोऽनध्यायः संध्ययोस्तु प्रत्येकं अपर्तावक

कालिकः अकाले त्रयाणां सन्निपाते यदा कदाचित्कृते त्र्यहं अनुराधामारभ्य षोडशसु ऋक्षेषु यावत्सूर्यस्तावदकालः यावद्भूमिर्व्युदके त्येके ऋतौ तु संध्यातिरिक्ते त्रयमेलने तत्कालमेव
संध्यायां सज्योतिःद्वयोः सन्निपाते द्विदिनं केवलातिवृष्टावपि त्रिदिनं अतिमारुते त्र नाध्येयं अपराह्णे गर्जे विद्युति वा उल्कायां वा संपूर्णरात्रमनध्यायः प्रदोषे चेदपररात्रपर्यंतं तथा संध्य
योर्नाध्येयं दुर्गंधोच्चलब्धौ च समानग्रामे शिष्टे च गृहाद्गते यावदनुज्ञं ग्रामांतरिणे त्वहः खरोष्ट्राश्वेरिणगजवृक्षनौयानारोहणे च तथा श्यामः प्रौढपादश्च भीतः कुब्जावसिक्थकः भु
क्तार्द्रपाणिर्जग्ध्वा च सूतकान्नं निरामिषं नीहारे वारिमध्ये च वाक्शस्त्रकलहे तथा वांते जीर्णे प्रहारेण रुधिरे च परिस्रुते शाल्मलिश्लेष्मातकमधूककोविदारकपित्थच्छायासु गोविप्रा
वरोधने श्वादिपंक्तौ भुंक्ते उद्गारे मैथुने वाससः परिधाने च रविपरिवेषे च अभ्यंगस्नानकाले च प्रौढपादपादारोपितपादः प्रसारितपादो वा अपरेद्युर्यावत्सायंकालस्तावत्कालमेवाका
लिकं एवमाद्याध्ययने त्र्यहं विद्युत्सहितोल्कापातेपि त्र्यहं अल्पदिग्दाहादौ तात्कालिकं उपाकर्मणि कृते त्र्यहं उत्सर्जने आद्याध्ययने त्र्यहं अन्यत्राह अन्यत्र साधारणार्थे
ध्ययने मंत्रब्राह्मणयोरेकसमाप्त्यारण्यकमधीत्य तदह्नि नान्यत्राध्येयं ग्रस्तास्ते संपूर्णग्रासे त्र्यहं अन्यत्र तदहराकालिकं वा प्रेतश्राद्धादिकं भुक्त्वा प्रतिगृह्य च त्र्यहं अ
न्नजरणावधि वा पूर्वावधिश्चानिमंत्रणकालः अन्यश्राद्धेष्वहोरात्रं श्राद्धकर्तुरप्यहोरात्रं अल्पोत्सवे भुजेरूर्ध्वं उत्सवांते अहस्सु उपनयनोद्वाहप्रतिष्ठोपाध्यायनादिषु अहः
यज्ञे चावभृथांतमृत्विजामाचार्याणां चोभाभ्यां गुरुशिष्यांतरागमने वर्षं श्वपाकाजशिशेः षण्मासं नवसूकरैस्त्रिरात्रं विड्वराहोष्ट्रखरश्वाहिमार्जारमूषकनकुलोलूककरटगृध्रहं
समंडूकगोऽविअश्वाश्वतरमहिषवानरऋषभसरीसृपरुरुवृषभमृगैरंतराये अहोरात्रं अथाध्ययने त्र्यहं एतदितरं सूक्ष्मपशुपक्ष्यादिअंतरायेन दोषः इंद्रध्वजोच्छ्रायपा
तदिने च एते च सर्वे मेधाविनां दुर्मेधिनां भूरिवेदाध्येतॄणां च चतुर्दश्यष्टमी पर्वप्रतिपत्स्वेव एते च वेदस्यैव ग्रहणधारणाध्ययनयोः न त्वंगाध्ययने अंगानां त्वष्टमी चतुर्दशी प्रति
पत्सर्वाण्येव ग्रहणं च सर्वानध्यायः ब्रह्मयज्ञस्य द्वावनध्यायौ यदात्माशुचिर्यद्देशश्च अनवरतविद्युदादिसंपाते तात्कालिकश्च अनध्यायाध्ययने गुरुशिष्ययोरायुषः क्ष
य इत्यनध्यायाः अथ मासनिर्णयः मासाहिदिनचातुर्विध्याच्चतुर्विधाः एकं तिथ्यात्मकं चांद्रं दिनं अहोरात्रात्मकं सावनं रवेः राशित्रिंशांशभोगेन सौरं चंद्रनक्षत्रभोगेन नाक्ष
त्रं त्रिंशत्तिथिसमुदायः शुक्लदर्शांतो मुख्यश्चांद्रः कृष्णादिपूर्णिमांतो वा त्रिंशदहोरात्रः सावनः रवेरेकराशिभोगेन सौरः चंद्रस्य सर्वर्क्षपरिवर्तनेन नाक्षत्रः स च सप्तविंशति
दिनात्मकः यत् किंचित्तिथिसमुदायोपि गौणश्चांद्रः अस्य मासाब्दिकादावुपयोगः चैत्रादिशब्दैश्च सौरचांद्रयोरेव व्यवहारः नान्ययोः तत्रापि शुक्लचांद्रवचना एव मुख्याः
शेते विष्णुः सदाषाढ इत्यादौ आषाढभाद्रपदादयोपि चांद्रा एव पक्षशब्दोपि प्रतिपदादिपूर्णिमांतः तदाद्यमांततिथिसमुदायवचन एव सौराद्यर्तुषु गौणः एवं वसंतादयो
पि चांद्रमासद्विकद्विकवचना मुख्याः सौरे तु गौणाः कृष्णादौ च एवं संवत्सरोपि चैत्रशुक्लप्रतिपदादिफाल्गुनदर्शांतो मुख्यः सौरादिस्तु गौणः एवं च तत्तत्तिथिमारभ्य ष
ष्ट्यधिकत्रिशततिथिसमुदायोपि गौणः अयने तु सौरमानेनैव विवाहादौ सौरमासः यज्ञादौ सावनः आब्दिकादौ चांद्रः तिथिकृत्येषु कृष्णादिः एवं विप्रस्यामापरिच्छिन्नो

नागेशति॰

मासः नृपस्य संक्रांतिपरिच्छिन्नः वैश्यस्य पौर्णमासीपरिच्छिन्नः विंध्यदक्षिणे शुक्लादिः तत उत्तरभागे कृष्णादिः तत्राब्दिकादौ चांद्रः त्रिंशत्तिथिसंबद्धो गौणः विंध्य
दक्षिणादि देशव्यवस्थाः संकल्पाद्युल्लेखमासविषयाः इति नागेशकृततिथिनिर्णयः संपूर्णः
शराग्न्यद्रिकुयुक्शाके श्रीमुख्यब्दे नभःसिते जड्योपाह्वघनश्यामोऽलिखद्गुर्जरपत्तने नागोजीकृततिथ्यादिनिर्णयं जयदं जयं ॥ श्रीविश्वेशार्पितमस्तु॰